# चतुर्थोऽध्यायः।

## भोजव्याकरणम्।
## विशदं साङ्गोपाङ्गमध्ययनम्।

### (अ) प्रथमा वृत्तिः

महोपाध्याय श्रीविनयसागर विरचित भोजव्याकरणस्य प्रथमावृत्त्याः

प्रथमे सन्ध्युपयोगि प्रकरणे- मङ्गलाचरणे (१) प्रथमं नमस्कारं लोकेशाय विधाय [१] सन्ध्युपयोगिसंज्ञासूत्राणि कथयन् (२) अ इ उ ण् इत्यादौ सन्धिकार्यं न भवति (३-६) इति [२] पाणिनिमतं स्वीकृत्य सारस्वतप्रत्याहारसूत्रेष्वपि सन्धिकार्यं निषेधयन्, सन्ध्यक्षराणि (७-८) ह्रस्वदीर्घप्लुताः (९-११) उदात्तानुदात्तस्वरिताः [३] (१२-१४), अनुनासिकः (१५), नामी (१६-१७), इत्याद्याः संज्ञाः प्रदाय प्रत्याहारस्य सर्वाक्षरसंग्रहीति [४] निर्देशानन्तरं विंशति प्रत्याहाराणां गणना (१८-२७), हसाः इति व्यञ्जनानि [५] (२८-२९), इत् (३०-३१), लोपश् ,अथ चाऽऽदेशागमौ (३२), कु चु टु तु पु संयोगः (३३), वृद्धिः (३४) टि (३५)संयोगादि परे ह्रस्वो विसर्गानुस्वारौ च दीर्घसंज्ञाभाजिनः (३६) इति विषयाः महोपाध्यायश्री विनयसागरेण वर्णिताः।

द्वितीये स्वरसन्धिप्रकरणे - यण्सन्धि विषयकां चर्चां (१-७), पुरस्कृत्य 'हर्यत्र' इत्युदाहरणे जलतुम्बिकान्यायम् [६] (८-१०),अयादि सन्धिः (११-१६), लोपश् [७] (१७-१९), एङ् पदस्य पूर्वरूपता (२०) सवर्णदीर्घः (२१), टिलोपस्योदाहरणानि (२२-२५), गुणसन्धिः (२६-२८), वृद्धिसन्धिः (२९-३१) चेति विषयाः प्राप्यन्ते।

तृतीये प्रकृतिभावप्रकरणे -कारिकात्रयेण प्रकृतिभावः सोदाहरणं व्याख्यातः।

चतुर्थे व्यञ्जनसन्धिप्रकरणे -प्रथमं जब-भावः, (१) ञम-भावः (२), शत्वम् (३), हकारस्य सवर्णभावः (४) श्चुत्वम् (५-७), ष्टुत्वम् (८-१२), सक्-आगमः (१३-१५), ङ् ण्-भावः (१६), छ त्व म (१७-१८) मस्य नस्य चाऽनुस्वारत्वम् [८] (१९-२२), इति विषयाः सोदाहरणं प्रदत्ताः।

पञ्चमे विसर्गसन्धिप्रकरणे - विसर्गकार्यम् (१-३), तस्य रेफत्वम् (४-५), उकारः (६) लोपश् (७-८), रेफे परे रेफस्य लोपः (९-१२), पादपूरणसन्धिः (१३-१६), चतुर्विधं बाहुलकम् (९) (१७-२०) इति विषयाः सोदाहरणं स्पष्टीकृताः ।

षष्ठे सप्तविभक्तिप्रकरणे - स्यादि-त्यादि-विभक्तीः (१) प्रस्तूय नामसंज्ञा (१०) (२) तद्धित-समासानामपि नामसंज्ञा (११) (३), विधाय सप्तविभक्तीनां सि-औ-जस्-अम्-औ इत्यादयः एकविंशति प्रत्ययाः उल्लिखिताः ।

सप्तमे स्वरान्तपुंल्लिङ्गप्रकरणे - पदसंज्ञानन्तरं (१), पुल्लिंङ्गदेवशब्दस्य सम्पूर्णरूपसाधनानन्तरं देवशब्दस्य 'रामो राजमणि'रित्यनया रीत्या देवो देवगृहे ० (१२) इति पद्यं पुरस्कृत्य (२-२५) सर्व-सर्वनाम्नः साधनिका (२६-४८), मास-मास् (४९-५२), विश्वपाः (५३-६०), इकारान्त समकालोकारान्ताः (६१-९२), सुश्रीः, स्वयम्भू, सेनान्यादि साधना (९३-१०४), ऋकारान्त शब्दानां साधना (१०५-१२०), ऐकारान्तानां (१२१-१२२), ओकारान्तानां (१२३-१२५) औकारान्तानां च (१२६-१२९) साधनाः कृताः ।

अष्टमे स्वरान्तस्त्रीलिङ्गप्रकरणे - आकारान्त गङ्गाशब्दस्य साधनिकापूर्वकं रूपाणि (१-६), तदनन्तरं श्रध्धा-मेधा-धारा इत्याद्याकारान्त स्त्रीलिङ्गशब्दगणनम् (७-८), सर्वनामरूपसाधना (९-१०), जरा-जरसोः साधना (११-१३) इकारान्त बुद्धिशब्दस्य, उकारान्त धेनुशब्दस्य च (१४-१७), ईकारान्त नदीत्यादि शब्दानां (१८-२२), ऊकारान्त वधूशब्दस्य (२३), लक्ष्मीरित्यादि शब्दानां (२४-३२), ऋकारान्त शब्दानां साधनिकापूर्वकं रूपाणि प्रकथ्य (३३), ओकारान्तस्यौकारान्तस्य च (३४) साधनिकापूर्वकं रूपाणि प्रस्तुतानि ।

नवमे स्वरान्त नपुंसकलिङ्गप्रकरणे - कुलम् (१-६), अन्यत् (७), इतरदादि (८), 'अस्थि' इत्यादि (९-१० एवं ११-१७) एवं उशनस् -स्त्रिरूपप्रतिपादनकारिका (११), ग्रामणी (१८ एव २४), वारि, पीलु (२१), उक्तपुंस्कभावः (२२), कर्तृ इत्यादि शब्दानां साधनिकासहित रूपाणां च विवेचनं वर्तते ।

दशमे हसान्तपुंल्लिङ्गप्रकरणे -अनडुह् (१-१२), तुराषाह् (१३) द्रुह् (१४), चतुर् (१५-१९), राजन्नादि (२०-२४). मघवन्नादि (२५-२८), पथिन्नादि (२९-३५), बृहन्नादि (३६-४०) नकारान्ताः, पञ्चन्नादयश्च सङ्ख्यावाचक शब्दाः (४१-४९), इदमादीनि सर्वनामानि (५०-५८),

प्रशान् (५९), बुध् (६०-६१). छकारान्तादयः (६२-७०), षट् (७१-७२), त्यदादि सर्वनामानि (७३-७६), अग्निमथादि (७७-७९), अञ्चूत्तरपदम् दिशादि (८०-९३). अग्निचित् (९४), महत् (९५-९६), भवत्सर्वनाम् (९७-९८), उपधादीर्घनिषेधः, पुंस् शब्दः (९९-१०१), विद्वस् (१०२-१०४), उशनसादि (१०५-१०९), दोषादि षकारान्ताः (११०-११४), अदसादि सर्वनामानि (११५-११८) एवमेतेषां क्रमेण रूपसाधना प्रदर्शिता वर्तते।

एकादशे हसान्तस्त्रीलिङ्गप्रकरणे - हकारान्तस्य उपानह शब्दनिरूपणानन्तरं (१-२) दिव् (३), तिसृ-चतसृ संख्यावाचकौ (४-६), धूरादि (७-९), त्यदादि सर्वनामानि (१०-१२) अबादि पकारान्ताः (१३-१४), स्वतवसादि सकारान्ताः (१५), दिगादि शकारान्ताः (१५-१६), अन्ते च अदस् सर्वनाम्नः (१७) रूपसाधनानिरूपणं कृतं वर्तते।

द्वादशे हसान्तनपुंसकलिङ्गप्रकरणे - सर्वेषां क्लीबशब्दानां रूपसाधना पुंवत्-इत्युत्सर्जनं पुरःस्थाप्य (१-२), सि-अम् प्रत्यययोः लुक् विधानम् (३) चतुर्-संख्यावाचकस्य रूपाणि (४), नकारान्त शब्दसाधना (५-७), त्यदादि सर्वनामसाधना (८-९), प्रत्यञ्च् शब्दस्य (१०), जगदादि (११-१२)असन्ताः इत्येतेषां रूपसाधनाः (१३-१५) वर्णिताः।

त्रयोदशे युष्मदस्मदोः स्वरूपप्रकरणे - युष्मदस्मदोः लक्षणम् (१), विविधाः आदेशाः (२-१२) एतेषामादेशानां विशेषविधिः, ते - मे - वाम् - नौ - वस्नसौ इत्येतेषां विशेषविधिः उदाहरणानि च (१३-१९) विशिष्टादेशानां सोदाहरणं निषेधकथनम् (२०-२३) वर्णितमस्ति।

चतुर्दशे 'अलिङ्गानि अव्ययानि' प्रकरणे - चादिगणे एकाशीति सङ्ख्याकानि (१-४), तत्रादीनि एकोनविंशतिः (५-९) अधस्तादीनि चत्वारि (१०-११), चन-चिदादीनि सादादीनि च नव (१२-१४), सद्यः आदीनि चतुर्विंशतिः (१५-१६), प्रादयः विंशतिः (१७-२१), क्तवादीनि द्वादश (२२-२४), इत्येवं एकोनसप्तत्युत्तरशतं (१६९) अव्ययानां परिगणनं सोदाहरणं कृत्वा चान्ते अव्ययलक्षणेन [१३] प्रकरणं समापितं वर्तते।

पञ्चदशे स्त्रीप्रत्ययप्रकरणे - आबन्त स्त्रीप्रक्रिया (१-५), तदनन्तरं काबन्तप्रक्रिया (६-१२), ईबन्त प्रक्रिया (१४-२१), आनीप् प्रक्रिया (२२-२६), ईबन्त प्रक्रिया (१४-४०), गुणलक्षणम् [१४] (४१) ऊ - प्रक्रिया (४२) आबन्तेबन्तोदन्तानां साधनाव्यवस्था (४३) प्रतिपादिता वर्तते।

षोडशे विभक्त्यर्थप्रकरणे - मङ्गलाचरणानन्तरं (१५) (१) सोदाहरणं प्रथमाविभक्तिः (२-९), कर्मणि द्वितीयाविभक्तिः (१०) कर्तरि कर्मणि भावे च प्रयोगाः (११-१२), सम्बोधन विभक्ति (१३-१५), सारस्वतसूत्रस्यैकस्य कर्मसम्प्रदानाद्यशेष विभक्तिस्थापनम् (१६-१८), कर्मणश्चतुर्विधत्वं तस्य सदृष्टान्तं निरूपणम् (१९-२१), आम्रेडितान्ताः अभितः, परितः इत्यादयः (२२-२७), तृतीया विभक्तिः (२८-२९), चतुर्थी विभक्तिः (३०), पञ्चमी विभक्तिः (३१-३२) षष्ठी विभक्तिः(३३), सप्तमी विभक्तिः (३४-३९), विनासहेत्याद्युपपद विभक्तिनिरूपणम् (४०-४४), निर्धारणे षष्ठी-सप्तमी विभक्तिद्वयम् (४५), स्वाम्यर्थे षष्ठीसप्तमी द्वयम् (४६-४८), कृदन्त प्रयोगः (४९-५०), स्मरणार्थे षष्ठी-द्वितीया विभक्तिद्वयं च (५१ अब), हेत्वर्थे तृतीयापञ्चम्यौ (५१कड -५३), अङ्गविकारे तृतीया(५५), जनिकर्तुः प्रकृतौ पञ्चमी (५६), 'आङ्' इत्यादीनां पञ्चमी (५७), तादर्थ्ये चतुर्थी (५८-५९), क्रुधादि प्रयोगे चतुर्थी (६०) क्यब्लोपे पञ्चमी (६१-६२), प्रयोजने सप्तमी (६४-६५), सतिसप्तमी विचारः (६६-७१), एवं विभक्त्यर्थ प्रक्रिया महोपाध्याय श्रीविनयसागरेण ग्रथिता वर्तते।

सप्तदशे समासनिरूपण प्रकरणे - समासप्रकरण निर्देशः (१), षड्विधाः समासाः (२-४), समासनियमः (५), समासानां सामान्य लक्षणानि (६-१०), समासलक्षणम् (११), अव्ययीभावसमास निरूपणम् (१२-१५), समासस्यपाणिन्युक्तदिशा पदत्वस्थापनम् (१६), अव्ययीभाव समासस्यसोदाहरणं विशेषविवरणम् (१७-३२), तत्पुरुष समास विवेचनम् (३३-३९), नञ् तत्पुरुष समासनिरूपणम् (४०-४६), द्वंद्व समासस्य सप्रकारकं विवेचनम् (४७-५८), द्विगुसमासः (५९-६१) बहुव्रीहिसमासः (६२-७५), सभेदः कर्मधारय समासः (७६-९०), एकशेष द्वंद्व समासः (९१-९३), व्यधिकरणबहुव्रीहि समासः (९४), नित्यसमासः (९५), एवं समासनिरूपणं,सोदाहरणं सविवेचनं, सप्रकारकं च महता वैशद्येन निरूपितं वर्तते।

अष्टादशे तद्धितप्रत्ययाख्य प्रकरणे - स्वकुलमातृपितृस्वनामनिर्देश पुरःसरं (१६) प्रकरणारम्भः (१), अपत्यार्थे प्रत्ययाः (२-१० अब), देवतार्थे प्रत्ययाः (१०कड-१२), णिदादि प्रत्ययाः (१६-१७), भावाद्यर्थीयाः प्रत्ययाः (१८-२२), त्यतनौप्रत्ययौ (२३-२५), स्वार्थे प्रत्ययाः (२६-२९), तुल्याद्यर्थे प्रत्ययाः (३०-३२), इमनादि प्रत्ययाः (३३-३५), मत्वर्थीयाः प्रत्ययाः (३६-४०), परिमाणार्थीयाः (४१-४३), इल-आलु प्रभृतयः (४४-४७), कल्प-देश्य-देशीयाः (४८-४९), चरट् प्रत्ययः(५०) मयट् प्रत्ययः (५१-५२) तदधीते तद्वेद (५३-५४) इत (च्) प्रत्ययः (५५) तरमादि प्रत्ययाः(५६-६७), दध्नादि प्रत्ययाः (६८), डतरडतमौ (६७-७०),

संख्यापूरणीयार्थाः (७१-८०), संख्याप्रकारे प्रत्ययाः (८१-८५), प्रथमावृत्याः समाप्तौ गुरुवन्दना [(१७)] (८६), भोजराजप्रशंसा [(१८)] (८७), च।

एवं प्रथमावृत्तौ अष्टादशप्रकरणेषु व्याकरणविषयकान् विविधविषयान् विवेचनोदाहरणनियमवैशिष्ट्यपुरःस्थापनेन महोपाध्याय श्रीविनयसागरः न केवलं स्वकीयं पाण्डित्यं वैशारद्यं च, अपि तु संस्कृतभाषाऽध्ययनेप्सून् पाणिनीयव्याकरणोदधिमज्जनोत्सूकान् अभ्यासून् सरलसहजसरसशैलीद्वारा तोषयति।

## (आ) द्वितीयावृत्तिः ॥

### भ्वादिप्रक्रिया

महोपाध्यायः श्रीविनयसागरः द्वितीयावृत्या आरम्भे भ्वादिप्रक्रिया इति प्रकरणारम्भे मङ्गलाचरणं विधाय [१९], द्वितीयावृत्तेः प्रस्तावं कृत्वा (२) प्रथमं भू धातोः अर्थाः (३) धातूनां त्रिप्रकारान् प्रदर्श्य ङिदित्-आत् (आत्मनेपदम्) ञिदित् (उभयपदम्), पम् (परस्मैपदम्) इत्यादि वर्णयित्वा (४) भ्वादि-अदादिश्रह्वादि-दिवादि-षुञादि-रुधादि-तनादि-क्र्यादि-चुरादि इति दशसमूहान् [२०] परिगणय्य (५-६), आत्मनेपदी-परस्मैपदी-उभयपदी संज्ञाव्यारव्याः (७-९), तिबादि अष्टादश प्रत्ययाः (१०), वर्तमानार्थे लट् लकारः, [२१]विध्यर्थे लिङ्, आशिर्वादार्थे लोट् ह्यस्तन भूतकाले लङ्, परोक्षभूतकाले लिट्. अद्यतनभविष्यत्काले लुङ् सामान्य भविष्यत्काले लृट्, क्रियातिक्रमणे लृङ्, अद्यतनभूतकाले लुङ् संज्ञाविधानम् (११-१२), वर्तमानकालस्य व्याख्या एवं प्रत्ययाः (१३) प्रथममध्यमोत्तमपुरुषविवेचनम् (१४), अकर्मकसकर्मक परस्मैपदात्मनेपदनिवेदनम् (१५) अप् विकरण प्रत्ययः (१६), तिबादि प्रत्यययोजनम् (१७-१९), भू-भवती-त्यस्य वर्तमानकालरूपसाधनिका (२०-२८), भूधातोः विध्यर्थरूप-साधनम् (२९-३५), भूधातोः आशीराज्ञार्थकरूपसाधना[२२] (३६-४३), भूधातोः अनद्यतन (ह्यस्तन) भूतकालस्य रूपसाधना (४४-४९), सार्वधातुकार्धधातुक संज्ञा (५०), भू धातोः परोक्ष भूतकालस्य रूपसाधना (५१-५६), एवं सृ-भृ-वृ-इत्यादि धातूनां सोदाहरणं ग्रहणम् [२३] (५७-५८), भूधातोराशिषिरूपाणि, (५९-६०), भूधातोः श्वस्तनकालरूपसाधना (६१-६७), भू धातोः क्रियातिक्रम रूपसाधना [२४] (६८-७२), अद्यतनभूतकाल रूपसाधना (७३-७७), परवर्ति धातुरूपसाधनाविषया परिभाषा (७८) चिति धातोः रूपविवरणम् (७९-८६), श्च्युतिर् (क्षरणे) धातोः (८७-८८), मन्थ (विलोडने) धातोः (८९-९२), कुथि-(हिंसायाम्) धातोः (९३-९५), षिधु-सिध्)धातोः (९६-१०६), खद्-(स्थैर्ये) धातोः (१०७-११०), गद (व्यक्तायां वाचि) धातोः (१११-११३ अब) रद (विलेखने) धातोः (११३ कड-१२१), णद (नद) अव्यक्ते शब्दे, अर्द (याचने) धातूनां च (१२२-१२५), इदि (परमैश्वर्ये) धातोः (१२६-१३२) णिदि (निन्द) निंदायाम् धातोः (१३३-१३४), अञ्च (गतिपूजनयोः) धातोः (१३५-१३७ अब) व्रज् (गतौ) धातोः (१३७ कड-१३८),उख (गतौ) धातोः (१३९-१४१), अज (गतौ) धातोः वी-आदेशकथनं (१४२-१५०), [२५]अजेर्वी-इत्यादेशानन्तरं रूपसाधनामध्ये एकादश संख्याकानां अनिट्कारिकाणां परिगणनम्[२६], (१५१-१६२ अब) क्षी-क्षये (१६२ कड-१६४), कटे-वर्षावरणयोः (१६५-१६६), गुपू = रक्षणे (१६७-१७५), तप = सन्तापे (१७६-१७७), कमू = पाद विक्षेपे (१७८-१८१), यम = उपरमे (१८२-

१८४), णमु = प्रह्वत्वे (१८५-१८६), गम्लृ = गतौ (१८७-१९३), इषु = इच्छायाम् (१९४-१९५) जि-जये (१९६-१९७) कृष = विलेखने (१९८-२०४) ऋष् = हिंसायाम् (२०५-२०७), मिह = सेचने (२०८-२१० अब.), दह = भस्मीकरणे (२१० कड-२१२ अब), ग्लै = हर्षक्षये (२१२ कड-२१७ अब) गै = शब्दे (२१७ कड-२२०), स्त्यै = शब्दसंघातयोः (२२१-२२२). दैप् = शोधने, धेट् = पाने (२२३-२२८), दृश् = (पश्य) दर्शने (२२९-२३२), ऋ = गतौ (२३३-२३६), सृ = गतौ (२३७-२४०), शद्लृ = शातने (२४१-२४२) षदलृ = विशरणादौ (२४३-२४४), पा = पाने (२४५-२४६), घ्रा = गन्धोपादाने (२४७-२४८), ध्मा = शब्दाग्निसंयोगे (२४७-२५०), ष्ठा (स्था) (तिष्ठ )= गतिनिवृतौ (२५१-२५१), म्ना = अभ्यासे (२५३-२५४), दाण् (यच्छ्) = दाने (२५५-२५७), ह्वृ = कोटिल्ये (२५८-२६१), स्कन्दिर् = गतिशोषणयोः (२६२-२६४) तृ = प्लवनतरणयोः (२७) (२६५-२६७), दंश = दशने (२७०-२७१), षञ्ज = सङ्गे (२७२)कित = रोगापनयने (२७३-२७८) पत्लृ = पतने (२७९-२८०) भ्रमु = चलने (२८१-२८३ अब) टुवम् = उद्गीरणे (२८३कड-२८५ अब), फण = गतौ (२८५ कड-२८६) स्वन = शब्दे (२८७-२८८ अब), वस = निवासे (२८८ कड-२९५), वद = व्यक्तायां वाचि (२९६-२९७), टुओश्वीर् = गतिवृद्ध्योः (२९८-३००)

## "भ्वादेरात्मनेपद प्रक्रिया" ॥

प्रथम भू = प्राप्ताविति धातोः वर्तमानरूपसाधना (३०१-३०३), विध्यर्थरूपसाधना (३०४-३०५), आज्ञार्थरूपसाधना (३०६-३०७), ह्यस्तनभूतकालरूप साधना (३०८) परोक्षभूतकालरूपसाधना (३०९-३११), आशीरर्थरूपसाधना (३१२-३१३), श्वस्तन-अद्यतन भविष्यत्कालरूपसाधना (३१४-३१५), अनद्यतनभविष्यत्रूपसाधना (३१६-३१७ अब), क्रियातिक्रमरूपसाधना (३१७ कड-३२१), एध् = वृद्धौ (३२२-३२३), ईक्ष् = दर्शनादौ (३२४)ष्वञ्ज = स्वञ्ज = परिष्वङ्गे (३२५), त्रपुष्=लज्जायाम् (३२६-३२८), तिज् = निशानेक्षमायां च (३२९-३३२) गुप् = गोपनकुत्सनयोः (३३३), मान-विचारणे (३३४-३३७ अब), बध् (३३७ कड-३३९ अब) पण/पन = व्यवहारे - स्तुतौ (३३९कड-३४४ अब), अय = गतौ (३४४ कड-३४७), दय = दाने, हिंसादानयोश्च, घट = चेष्टायाम् (३४८-३४९ अब), ईह = चेष्टायाम् (३४९ कड-३५० अब), कासृ = शब्दकुत्सायाम् (३५० कड-३५१), षेवृ = सेव् = सेवने (३५२), गाङ् = गतौ (३५३-३५५ अब), रुङ् = गतौ भाषणे च (३५५ कड-३५७ अब), देङ् = पालने (३५७कड-३५९ अब), डीङ् = विहायसागतौ (३५९ कड-३६१) द्युत = द्योतने (३६२-३६५ अब), वृतु-वृत् = वर्तने (३६५ कड-

३६८), स्यन्दू = स्रवणे (३६९-३७२ अब), क्लृपु-क्लृप् = सामर्थ्ये (३७२ कड-३७७), व्यथ = दुःख-भय-चलनयोः (३७८-३७९), रम् = क्रीडायाम् (३८०-३८१), ञीत्वरा-त्वर = सम्भ्रमे (३८२), षह-सह-(३८३-३८५) ।

## ॥ भ्वादेरुभयपद प्रक्रिया ॥

प्रथमं राजृ = दीप्तौ (३८६-३८९ अब), रवन = रवनने (३८९ कड-३९१), हृञ् = हरणे (३९२-३९५ अब), दान् = अवखण्डने (३९५ कड-३९६), शान् = तेजने (३९६ अब) भज = सेवायाम् (३९७ कड-३९९ अब), डुपचश्-पच् = पाके (३९९ कड-४०१ अब) श्रिञ् = सेवायाम् (४०१ कड-४०४), त्विष् = दीप्तौ (४०५-४०७), यज = देवपूजादौ (४०८-४११), टुवप्-वप् = बीजतन्तुसन्तानयोः (४१२-४१४), वह् = प्रापणे (४१५-४१७), वेञ् = तन्तुसन्ताने (४१८-४२२), व्येञ् = संवरणे (४२३-४२५), ह्वेञ् = स्पर्धायाम् (४२६-४२८) [२८] ।

## ॥ अथ अदादिगणः ॥

प्रथमं अद् भक्षणे वर्तमानकालस्य रूपाणि, विध्यर्थ-आज्ञार्थरूपाणि (४२९-४३३), प्सा = भक्षणे (४३४-४३६), मा = माने (४३७-४३८), या = प्रापणे (४३९), रा-ला = दाने, वा = गतिगन्धनयोः, द्रा = कुत्सायाम्, ख्या = प्रकथने (४४०), भा = दीप्तौ (४४१), स्ना = शौचे (४४२), वश् = कान्तौ (४४३-४४७ अब) यम-रम-नमादि अनुदात्तधातूनां परिगणना [२९] (४४७ कड-४४९) हन = हिंसागत्योः सोदाहरणं उल्लेखः [३०] (४५०-४५५), यू धातोः रूपाणि (४५६-४५८), रु = शब्दे (४५९-४६०), टुक्षु = शब्दे (४६१-४६२), क्ष्णु = तेजने (४६३), स्नु = प्रस्रवणे (४६४-४६५ अब), इण् = गतौ, इक् स्मरणे (४६५ कड-४६८), अधि + इ (४६९-४७१), विद = ज्ञाने (४७२-४७८), अस् = भुवि (४७९-४८१) मृजुष् = शुद्धौ (४८२-४८६) वच् = परिभाषणे (४८७-४९० अब) रुदिर् = अश्रुविमोचने (४९० कड-४९५), ञिष्वप् -स्वप् = शये (४९६-४९८ अब), श्वस् = प्राणने (४९८ कड-५००), अन = प्राणने (५०१-५०२), जक्ष = भक्षहसनयोः (५०३-५०६), जागृ = निद्राक्षये (५०७-५१२), दरिद्रा = दुर्गतौ (५१३-५१७), शास् = अनुशिष्टौ (५१८-५२१ अब), चकासृ दीप्तौ (५२१ कड-५२४) धातूनां रूपसाधनानन्तरं अदादि परस्मैपदप्रक्रिया समाप्तिं गता ।

## अदादेरात्मनेपद प्रक्रिया प्रकरणे-

प्रारम्भे चक्षिङ् = व्यक्तायां वाचि धातोः वर्तमानकालरूप साधना (५२५) चक्षिङ् = व्यक्तायां वाचि धातोः विध्यर्थरूपसाधना (५२६), अद्यतनभूतकाले रूपसाधना (५२७-५२८ अब), ईड् = स्तुतौ (५२८ कड-५३०), ईश = ऐश्वर्ये (५३१-५३२), आस = उपवेशने (५३३), वसि-वस् = आच्छादने (५३४) णिसि = निस् = चुम्बने (५३५-५३६ अब) षूड - सू = गर्भविमोचने (५३६ कड-५३८) शीङ्-शी = स्वप्ने (५३९-५४१), ईङ्-ई = अध्ययने (५४२-५४५) रूपसाधनां कृत्वा इदं प्रकरणं सम्पूर्णतां गतम् ।

## अदाद्युभयपदि प्रकरणे -

प्रारंभे द्विष् = अप्रीतौ धातोः रूपसाधना (५४६-५४८), दुह् = प्रपूरणे (५४९-५५३), लिह् = आस्वादने (५५४-५५७ अब), ष्टुञ्-स्तु = स्तुतौ (५५७ कड-५६०), ब्रूञ्-ब्रू = व्यक्तायां वाचि (५६१-५६५) धातोःरूपसाधनां कृत्वा इयं प्रक्रिया पूर्णतां गता।

## अथ ह्वादिगणः ॥

परस्मैपदप्रक्रियायां प्रथमं हु = दानादानयोः धातोः रूपसाधना (५६६-५७४ अब), ञिभी = भये(५७४ कड-५७७ अब), ह्री-लज्जायाम् (५७७ कड-५७९) पृ = पालने (५८०-५८७), ओहाक्-हा = त्यागे (५८८-५९३), ऋ = गतौ (५९४-५९६) ।

ह्वाद्यात्मनेपदप्रक्रियायां ओहाङ्-हा = गतौ (५९७-६००), माङ-मा = माने (६०१-६०२)।

ह्वाद्युभयपदप्रक्रियायां प्रथमं डुभृञ्-भृ = धारणपोषणयोः (६०३-६०५), डुदाञ् - दा = दाने (६०६-६१०) डुधाञ्-धा = धारणपोषणयोः (६११-६१३ अब), णिजिर्-जि = शौचपोषणयोः (६१३ कड-६१८ अब), विष्लृ-विष् = व्याप्तौ (६१८ कड-६२०) धातूनां रूपसाधना कृता।

## अथ दिवादिगण : ॥

प्रथमं दिवु-दिव् = क्रीडाविजिगीषाव्यवहारद्युतिस्तुत्यर्थे (६२१-६४१ अब), सिवु - सिव्=तन्तुसन्ताने (६२४ कड-६२५), नृती = गात्रविक्षेपे (६२६-६२८), जृष् = वयोहानौ

(६२९-६३१ अब), शो = तनूकरणे (६३१ कड-६३३ अब), छो = छेदने (६३३ कड-६३४) षो-सो = अन्तकर्मणि-(६३५), दो = अवखण्डने (६३६ अब) व्यध् = ताडने (६३६ कड-६३७ अब), श्लिष् = आलिङ्गने (६३७ कड-६३८) तृप्-प्रीणने (६३९-६४१), मुह् = वैचित्ये (६४२-६४३), नश् = अदर्शने (६४४-६४६), शम् = उपशमे (६४७-६४८), दम् इत्यादि धातूपरिगणना, (३१) (५४९ अब), ञिमिदा-मिद् = स्नेहने (६४९ कड-६५१) असु - अस् = क्षेपणे (६५२-६५३), रूपसाधनानन्तरं इयं प्रक्रिया पूर्णतां गता।

दिवाद्यात्मनेपद प्रक्रियायां -जनी-जन् = प्रादुर्भावे (६५४-६५८), दीपि-दीप् = दिप्तौ (६५९-६६० अब), पूरी = आप्यायने (६६० कड-६६१), पद् = गतौ (६६२-६६४), बुध् = अवगमने (६६५-६६६)।

दिवाद्युभयपदी प्रक्रियायां - णह्-नह् = बन्धने (६६७-६६८) धातोः रूपाणि प्रदर्श्य इयं प्रक्रिया पूर्णतां गता।

## "अथ स्वाद्युभयपदिनः"

षुञ् - सु = अभिषवे (६६९-६७५), चिञ्-चि = चयने (६७६-६७९), स्तृञ्-स्तृ = आच्छादने (६८०-६८३ अब), वृञ्-वृ = वरणे (६८३ कड-६८६ अब), धूञ्-धू = कम्पने (६८६ कड-६८९)।

स्वादि परस्मैपदि प्रक्रियायां - हि गतौ वृद्धौ च (६९०-६९१), शक्लृ -शक् = शक्तौ (६९२-६९३ अब), धिवि = प्रीतौ, कृवि = हिंसायाम्, श्रृ = श्रवणे (६९३ कड - ६९६)।

स्वाद्यात्मनेपद प्रक्रियायां - अशूङ्-अश् = व्याप्तौ (६९७-६९९) धातोः रूपसाधनां कृत्वा प्रक्रिया पूर्णा सञ्जाता।

## अथ रुधादिगणः।

उभयपदि प्रक्रियायां -रुधिर्-रुध् = आवरणे (७००-७०३), छृदिर्-छृद् = दीप्ति-देवनयोः (७०४-७०८ अब), तृदिर्-तृद् = हिंसा-अनादरयोः (७०८ कड-७११)।

रुधादि परस्मैपदि प्रक्रियायां- श्लिष्लृ-श्लिष् = विश्लेषणे (७१२-७१३), हिंसि-हिंस् = हिंसायाम् (७१४-७१६) भञ्जो-भञ्ज् = आमर्दने (७१७-७१८), अञ्ज् =व्यक्तिमृक्षणकान्तिगतिषु (७१९-७२०) धातूनां रूपसाधना कृता वर्तते।

रुधाद्यात्मनेपदि प्रक्रियायां - ञिइन्धी-इन्ध् = दीप्तौ (७२१-७२२) धातोः रूपसाधनां कृत्वा प्रक्रिया परिसमाप्ता।

## अथ तनादिगणः

उभयपदिप्रक्रियायां तनु-तन् = विस्तारे (७२३-७२७), क्षणु = हिंसायाम् (७२८-७३२ अब), डुकृञ्-कृ = करणे (७३२ कड-७४२) धातूनां सोदाहरणं रूपसाधनां [३२], कृत्वा इयं प्रक्रिया परिसमाप्ता।

तन्वाद्यात्मनेपद प्रक्रियायां - वनु-वन् = याचने (७४३-७४४ अब), मनु-मन् = अवबोधने (७४४ कड-७४५) धात्वोः रूपसाधनां कृत्वा इयं प्रक्रिया परिसमाप्ता।

## ॥ अथ तुदादिगणः ॥

उभयपदि प्रक्रियायां तुद् = व्यथने (७४६-७५० अब), भ्रस्जो-भ्रस्ज = पाके (७५० कड-७५५ अब), मुच्लृ-मुच् = मोचने (७५५ कड-७५७), मुचादिधातूनां परिगणना [३३] (७५८ अब), लिप् = उपदेहे (७५८ कड-७६१ अब), षिच्-सिच् = क्षरणे (७६१ कड-७६३)।

तुदादि-परस्मैपदि प्रक्रियायां कृती-कृत् = छेदने (७६४-७६५), ओवृश्चु = छेदने (७६६-७६७), कृ = विक्षेपे (७६८-७७० अब), गृ = निगरणे (७७० कड-७७२ अब) स्पृश् (७७२ कड-७७४ अब), पृच्छ = ज्ञीप्सायां (७७४ कड-७७६ अब), सृज = विसर्गे (७७६ कड-७७७), टुमस्जो-मस्ज् = शुद्धौ (७७८-७७९), विच्छ्-गतौ (७८०-७८२)।

तुदाद्यात्मनेपदि प्रक्रियायां मृङ्-मृ = प्राणत्यागे (७८३-७८५), दृङ् = आदरे (७८६), धृङ्=स्थितौ, ओलस्जी-लस्ज् = लज्जायां धातूनां रूपसाधनां (७८७-७८८) कृत्वा संपूर्णा गता।

## अथ क्र्यादिगणः ।

उभयपदिप्रक्रियायां डुक्रीञ्-क्री = द्रव्यविनिमये (७८९-७९४ अब), पूञ् = पवने (७९४ कड-७९८ अब) कृञ् = हिंसायाम् (७९८ कड-८०१ अब), ग्रह = उपादाने (८०१ कड-८०५) ।

क्र्यादि परस्मैपदि प्रक्रियायां पुष् = पुष्टौ (८०६-८०७), मुष् = स्तेये (८०८) शृ = हिंसायाम् (८०९-८१० अब), ज्या = वयोहानौ (८१० कड-८१२), ज्ञा = अवबोधने (८१३-८१४ अब), कुषि-कुष् = कर्षणे (८१४ कड-८१५ अब), अश् = भोजने (८१५ कड-८१६) ।

क्र्याद्यात्मनेपदिप्रक्रियायां वृङ्-वृ = संम्भक्तौ (८१७-८१८) धातोःरूपसाधनां कृत्वा समाप्ता इयं प्रक्रिया ।

## अथ-चुरादयः ।

चुर् = स्तेये (८१९-८२३), अर्च = पूजायाम् (८२४-८२६) कृत = संशब्दे (८२७-८२८ अब), गण = संख्याने (८२८ कड-८२९), कथ = कथने-वाक्यप्रबन्धे (८३०-८३१) इत्यादिधातूनां साधनाप्रक्रिया चर्चिता वर्त्तते ।

## ११. ञ्यन्त प्रक्रिया ।

एकादशे ञ्यन्त प्रक्रियाप्रकरणे धातोः प्रेरणे ञि प्रत्यये कृते कृ-करोति-कारयति-अचीकरत् (८३२), इत्यारभ्य हन्-धातयति (८३३), शद्लृ-शातयति, (३), आकारान्त धातूनां डुदाञ्-दापयति (४), डुधाञ्-धापयति (५), स्था-स्थापयति (६)पा-पाययति (७), शो-शाययति (८), युगागमः (९), छो-छाययति (१०), षो-साययति (११), ह्वेञ्-ह्वाययति, व्येञ्-व्याययति (१२-१४),रभ्-रम्भयति (१५), प्रीञ् -प्राययति, धूञ्-धूनयति, स्मि-स्माययति (१६-१७), सह् धातोः विकल्पेन पकारे रोहयति-रोपयति (१८), कृप् (कल्प्)-कल्पयति, वृत्-वर्तयति (१९-२१), मृजुष् (मृज्)-मार्जयति (२२), ईङ्-क्री-जि-ली-इत्यादि-धातूनामाकारे पुगागमे च अधि + ईङ् - अध्यापयति, डुक्रीञ् (क्री)-क्रापयाति जि-जापयति (२३-२५), लीङ् (ली)-लापयति (२६), ह्री-ह्रेपयति, ब्ली-ब्ले पयति (२७-२८), क्नूयी-क्नूय्-क्नोपयति (२९), क्ष्मायी-क्ष्माय्-क्ष्मापयति, ढौकृ-

ढौक्-ढौकयति (३०-३१), टुयाचृ-याच्-याचयति, शास्-शासयति, दरिद्रा-दरिद्रायति (३२-३३), दुष्-दोषयति (३४-३५), धातूपाठपठित मित् धातूनां ह्रस्वे कृते घटयति (३६), व्यथ-व्यथयति (३४) (३७), जनि-जायते-जनयति, जृष्- जीर्यति-जरयति, क्नस्-क्नस्यति-क्नसयति,रञ्ज्-रञ्जयति (३८-४०), शम्-शमयति, दम्-दमयति (४१), ज्ञा-जानाति-ज्ञापयति-ज्ञपयति च, ज्वल-ज्वलति-ज्वलयति, ग्ला-ग्लायति-ग्लपयति, स्ना-स्नाति-स्नपयति (४२-४४), प्र+ज्वल्-प्रज्वलति-प्रज्वालयति (४५), इण्-गतौ धातोः विकल्पेन गमादेशे गमयति-आययति (४६), स्फाय-(वर्धने) धातोः स्फावयति इति रूपाणि प्रसाधितानि।

## १२. सप्रत्यय प्रक्रिया ।

आत्मनः इच्छायां स प्रत्यये कृते धातोः द्वित्वं भवति यथा भू-भवति -बुभूषति (८७९-८८०), ऋकारान्तानां वेट् धातूनां तृ-तरति-तितरिषति-तितीर्षति, (३-४), चिञ्-चिनोति-चिकीर्षति-चिचीषति (५), डुपचष् (पच्)-पचति-पिपक्षति (६), यू-यौति-युयूषति, जि-जयति-जिगीषति, पा-पिबति-पिपासति, मृङ्-मुमूर्षति (७), पृ-पुपूर्षति, वृङ्-वृञ्-वुवूर्षति (८), प्रच्छ्-रुद-विद्-मुष्-ग्रहि्-स्वप् आदीनां गुणवृद्धि निषेधे पिपृच्छिषति, रुरुदिषति, विविदिषति, मुमुषिषति, जिघृक्षति, सुषुप्सति (९-१०), कृ-किरति-चिकरीषति, गृ-गिरति-जिगरिषति, दृङ्-द्रियते-दिदरिषति, घृङ्-दिधरिषते (११-१३), पृच्छ-पिपृच्छिषति, स्मिङ्-सिस्मयिषते (१४), अञ्जू-अनक्ति-अञ्जिजिषति, अशूङ्-अश्नुते-अशिशिषते, (१५) ऋ-अरिरिषति, अद्-अत्ति-घस्-जिघासति, हन्-जिघांसति (१६), इङ्-इण् (अधिपूर्वके) गमादेशे अधिजिगांसते, गम् धातोः इडागमे जिगमिषति (१७), दा-ददाति, धा-दधाति, रभ्-रभते, लभ्-लभते, शक्-शक्नोति, पत्-पतति, पद्-पद्यते, मी-मीनाति, मा-मिमीते, एवं मेङ्-मयते एतेषां धातूनां स्वरस्य इकारे, पूर्वाभ्यासलोपे च कृते सस्तोऽनपि (२, १.१५०), इति सूत्रेण दित्सति-धित्सति-रिप्सते-इत्यादीनि रूपाणि (१८-१९), पिपतिषति-पित्सति, पद-पित्सते,मी-मित्सति (२०), दम्भ्-दिदम्भिषति, ज्ञा-जिज्ञपयिष्यति, (२१-२३), आप् धातोः ईप्सति (२४), अश् धातोः अनायादेशे अशनायति-अशिशिषति, तन्-तितनिषति-तितांसति-तितंसति, दरिद्रा-दिदरिद्रासति (२५-२७) इति रूपाणि साधितानि।

## १३. यङ् प्रक्रिया ।

अतिशये हसादेयर्ङ् द्विश्च (२,१३.१) इति सूत्रेण हसादि-व्यञ्जनादिधातूनां यङ् प्रत्यये द्विश्च कृते भू-भवति इत्यस्य सर्वाणि आत्मनेपदरूपाणि (९०६-९०९), भुज् -भुनक्ति (५-८), मुह्-मुह्यति, लिह्-लिह्यति इत्यादिनां, मोमुह्यते, लेलिह्यते इत्यादि रूपाणि (९-१०) ।

स्वरादि धातूनां अट्-अटति इत्यादीनां अटाट्यते इत्यादीनि रूपाणि, (११-१३), ञकारान्तानां, मकारान्तानां, जपादीनां च गम्-गच्छति-जङ्गम्यते, जप्-जपति- जञ्जप्यते इत्यादीनि रूपाणि (१४-२६), नृत्-नृत्यति, वृत्-वर्तते इत्यादीनां, नरीनृत्यते, वरीवृत्यते इत्यादि रूपाणि (२७-२८), वश्-वष्टि धातोः सम्प्रसारणे कृते वावश्यते (२९), पद्-पद्यते इत्यादीनां पनीपद्यते (३०-३१), ऋकारान्त धातूनां कृ -करोति-चिक्रीयते इत्यादीनि रूपाणि (३२-३३), दा-ददाति प्रभृतीनां देदीयते-देधीयते इत्यादीनि रूपाणि (३४), घ्रा-जिघ्रति-जिघ्रीयते, ध्मा-धमति-देध्मीयते (३५), इत्यादीनि रूपाणि भवन्ति।

वकारान्तानां, लकारान्तानां, यकारान्तानां च मामव्यते चञ्चल्यते, इत्यादीनि रूपाणि (३६-३७), हन्-हन्ति-जेघ्नीयते (३८), व्रज-व्रजति-वाव्रज्यते, चाय्-चाययति, इत्यस्य चेकीयते, अन्ते च कू-कवते-कोकूयते, शी -शेते-शाशय्यते इत्यादीनां धातूनां रूपाणि साधितानि।

## १४. यङ्लुक् प्रक्रिया ।

वाऽन्यत्र (२, १४.१), इति सूत्रेण यङो लुकि कृते भू-भवति- इत्यस्य-बोभोति-बोभवीति इत्यादीनि रूपाणि (९४८-९४९), पच्-पचति-पापचीति-पापक्ति इति, भुज्-भुनक्ति इत्यस्य बोभूजीति-बोभोक्ति (३-४), घट-घटयति इत्यस्य जाघटीति-जाघट्टि (५), ऋकारान्तानां कृ-करोति-इत्यादीनां चकर्ति इत्यादीनि रूपाणि, ऋकारान्तोपधानां च वृत् -वर्तते -वर्वर्ति इत्यादीनि रूपाणि (६-९), वञ्च्-वञ्चते इत्यस्य वनीवङ्क्ति इत्यादीनि रूपाणि, गम्-गच्छति इत्यस्य जङ्गमीति, हन्-हन्ति इत्यस्य जङ्घतीति, अन्ते च आकारान्तानां हा-जहाति इत्यादीनां जाहेति-जाहाति इत्यादीनि रूपाणि साधितानि (१०-१३)।

## १५ – नामधातुप्रक्रिया ।

आत्मनः इच्छार्थे ''नाम्नो ई चास्य'' (२, १५.१) इति सूत्रेण नाम्नः - य- प्रत्येये कृते पुत्रमिच्छतीति पुत्रीयति, पुत्रीयेत्, पुत्रीयतु, पुत्रीयात्, पुत्रीयाञ्चकार, पुत्रीयता, अपुत्रीयत् इत्यादीनि रूपाणि (९६१-९६२), साधितानि। 'गां इच्छति' इत्यर्थे गव्यति-गवाञ्चकार इत्यादीनि रूपाणि, ततश्च, नावमिच्छति इत्येर्थे नाव्यति-नाव्येत् इत्यादीनि रूपाणि (४-५)। त्वामिच्छतीत्यर्थे त्वद्यति-त्वदाञ्चकार इत्यादीनि (६)। अस्मान् इच्छति इत्यर्थे अस्मद्यति, आत्मनः धनमिच्छति इत्यर्थे धनीयति-धनीयाञ्चकार इत्यादीनि रूपाणि (७-८), काम्यम् इच्छति इत्यर्थे पुत्रकाम्यति-पुत्रकाम्याञ्चकार इत्यादीनि रूपाणि साधितानि। (९)।

कण्डूं करोति इति करणार्थे च कण्डूयति-अकण्डूयीत् नमस्यति इत्यादीनि रूपाणि (१०)। करणार्थे शब्दादिभ्यः यङ् प्रत्यये कृते शब्दायते-शब्दायाञ्चक्रे-शब्दायिषीष्ट इत्यादीनि शब्द-वैर-मेघ-अभ्र-कलहादीनां रूपाणि (११-१२)।

उद्वमनकरणे यङ् प्रत्यये कृते उष्मायते-बाष्पायते इति रूपाणि (१३), करणार्थेव नाम्नः ञि प्रत्ययो डित् भूत्वा टिभागस्य च लोपे घट-घटयति (घटयते), महयति-अमीमहत् इत्यादीनि रूपाणि (१४), साधितानि।

ञिपरे ऋकारस्य रेफे कृते पृथु-प्रथयति-अपप्रथत, मृदु-मद्रयति-अमम्रदत् इत्यादीनी रूपाणि (१५)। उढि करोति इत्यर्थे उढयति ओजढत् (१६-१७)। आचारेऽर्थे उपमानात् यङ् कृते श्येनायते (काकः) इति (१८)। यङ् परे विकल्पेन सलोपे कृते पयसः रूपाणि पयायते-पयस्यते; ओजायते इति (१९)। नाम्नः आचारार्थे क्विप् प्रत्यये कृते कृष्ण इव आचरतीति कृष्णाति इति। गुरुः पुत्रवदाचरति शिष्यं इति पुत्रीयति शिष्यम्, प्रासादीयति कुट्याम् इत्यादीनि रूपाणि (२०-२१),

भृश इत्यादीनाम् अभूततद्भावे यङि कृते भृशायते इति (२२)। मैथेनेच्छायां य प्रत्यये कृते सकारागमे च अश्वस्यति-वृषस्यति इति (२३)। अन्ते च सूचनार्थे यङि कृते सुखायते इति रूपाणि साधितानि (२४)।

## १६ – आत्मनेपदव्यवस्था – II

नि पूर्वक विश् धातोः निविशते, वि-परा पूर्वक जि धातोः विजयते-पराजयते (९८५-९८७)। संपूर्वक गम् (गच्छति) धातोः सङ्गच्छते इति (४-६)।

अत्र गम्-गच्छति, ऋ-ऋच्छति, ऋ-इयर्ति, प्रच्छ-पृच्छति, स्वृ-स्वरति, श्रु-शृणोति, विद्-वेत्ति, दृश्-पश्यति इत्येतेषा-मात्मनेपदव्यवस्था समाना वर्तते। संपूर्वक ऋच्छ-समृच्छते, संपूर्वक ऋ समियृते, संपूर्वक पृच्छ-सम्पृच्छते, संपूर्वक स्वृ-संस्वरते, संपूर्वक विद्-संवित्ते, संपूर्वक दृश् (पश्यति)-सन्दृदशे इत्यादीनि रूपाणि (७-१७) साधितानि।

आङ्पूर्वक दा धातोः आदत्ते (१८) अनु-सम्-पूर्वक क्रीड् धातोः अनुक्रीडते सङ्क्रीडते-परिक्रीडते [(३५)] इत्यादीनि रूपाणि (१९)।

सम्-अव-प्र-उप-वि-पूर्वक स्था (तिष्ठति) धातोः सन्तिष्ठते इत्यादीनि। आङ् पूर्वक यम् धातोः आयच्छते, आपूर्वक हन् धातोः आहते। हन् धातोः आत्मनेपदे विकल्पेन वधादेशे कृते आवधिष्ट इत्यादीनि रूपाणि (२०-२२) उत्-वि-पूर्वक तप् धातोः उत्तपते-वितपते (२३-२४)। त्यागार्थे उत् पूर्वक चर् धातोः उच्चरते [३६]। सम् पूर्वक चर् धातोः तृतीयार्थे सञ्चरते (२५-२६)। वि-अव-परि-पूर्वक क्रीञ् (क्रीणाति) धातोः विक्रीणीते-अवक्रीणीते इत्यादीनि (२७)। उपालम्भे शप् (शपति) धातोः हरये शपते (२८)।

सनन्तानां ज्ञा (जानाति) धातोः जिज्ञासते, श्रु (शृणोति) धातोः शुश्रूषते. स्मृ (स्मरति) धातोः सुस्मूर्षते, दृश् (पश्यति) धातोः दिदृक्षते इत्यादीनि रूपाणि (२९-३२) [३७]।

गत्यर्थक धातूनां पठ्-पठति, हस्-हसति, जल्प्-जल्पति इत्यादीनां च परस्परं समान क्रिया साध्य-कर्मव्यतिहारार्थे आत्मनेपदमुक्तम्। (३३)। इतरेतर-अन्योन्य-परस्पर इत्यादि पदानामुपपदे आत्मनेपदाभावे 'व्यतिपठन्ति विप्रौघाः, 'व्यतिलुनन्ति हस्ताभ्याम्' इत्यादीनि रूपाणि, भोजनार्थस्य भुज् धातोः भुङ्क्ते इत्यादीनि रूपाणि (३४-३८) [३८]।

## १७ – भावकर्मप्रक्रिया ॥

'आद्भुविकर्मणि' (२, १७.१) इत्यनेन यक्-प्रत्यये कृते, भू धातोः कर्मण्यर्थे आत्मनेपदे कृते अकर्मक-सकर्मक धातूनां व्याख्या [३९] (१०२८-१०२९) अकर्मक धातूनां गणना [४०] (३), भू (भवति) धातोः भूयते-भूयेत इत्यादीनि रूपाणि, (४-५), भावे प्रयोगे, कर्मणि प्रयोगे च स्वरान्त धातूनां हन् (हन्ति), ग्रह (गृह्णाति), दृश् (पश्यति), धातूनां परे सि-स-ता-सी स्थप् प्रत्ययेषु परेषु विकल्पेन इडागमः (६), सेट् धातूनां इडागमः नित्यत्वे, किन्तु अनिट् धातूनां इडागमः विकल्पत्वे, भविषीष्ट-भाविषीष्ट इत्यादीनि रूपाणि (७-९), अभावि (१०), सुखमनुभवति अन्वभावि इत्यादीनि रूपाणि, उपसर्ग प्रभावः [४१] (१३), शीङ् (शेते) धातोः शय्यते इत्यादि (१४-१५), कृ धातोः चक्रे, कारिषिष्ट इत्यादीनि (१६), चिञ् (चिनोति) धातोः चीयते-चिच्ये (१७-१८), दा (ददाति) धातोः दायिषिष्ट-दासीष्ट (१९-२०), धा-धीयते, स्था-स्थीयते, स्तू-स्तूयते, हन्-हन्यते- जघ्ने हन् (हन्ति) धातोः वधादेशे अवधि (२१-२५), ग्रह (गृह्णाति) धातोः सम्प्रसारणे कृते गृह्यते-जगृहे इत्यादीनि रूपाणि (२६-२८), दृश् (पश्यति) धातोः दृश्यते -दश्येत (२९-३० अब), पच् (पचति) धातोः पच्यते पक्ष्यते इत्यादि (३१ कड) तन् (तनोति) धातोः तन्यते -

तायते इत्यादि (३१-३२), भञ्ज् )भनक्ति) धातोः भज्यते इत्यादि (३३-३४), शम् (शाम्यति) धातोः शम्यते, ऋकारान्त धातोः अर्यते-आरि, स्मर्यते-अस्मारि (३५-३६) ।

## १८ – लकारार्थ प्रक्रिया ॥

वैचित्यापह्नवयोरल्पकालेऽपि णादिः (२, १८.१) इत्यनेन सूत्रेण चित्तक्षुब्धता एवं अत्यन्त-नकारार्थे अल्पकालेऽपि उत्तमपुरुषस्य परोक्षकालिन प्रत्ययाः विधीयन्ते, एवं हठाग्रहे, पौनःपुन्येऽर्थे लोट्लकारे मध्यमपुरुषस्य एकवचनं निपात्यते [४२] (१-३), लङ् भविष्यत्यर्थे यावत्-पुरा स्थाने लट्-लकारस्य प्रत्ययाः, (४), वर्तमानकालार्थक क्रियापदस्य स्म-प्रत्यये कृते भूतकालस्यार्थः (५) मा - इत्यव्ययस्य स्म इत्यस्य च प्रयोगे अट् लोपे कृते मा भूत् स्म भूत् इत्यादि (६), कथयित्वा अन्ते श्रीकल्याणसागर स्मरणेनोपसंहति [४३](७-८) ।

# (इ) तृतीयावृत्तिः ॥
## ''कर्त्रर्थ प्रक्रिया''

आदौ श्री आदिनाथं गणेशं च नमस्कृत्य कर्मणि भावे च कृत् प्रत्यये कृते कर्तर्यर्थे धातोः तृ-वृण्-प्रत्यये कृते, पच्-पक्तृ-वच्-वक्तृ इत्यादयः (१-३), वस-प्रत्याहारवर्णादौ कृत्-प्रत्ययानां इडागमे कृते भू (भवति) इत्यादीनां भविता, यविता, गोप्ता-गोपिता इत्यादीनि (४-५), इष् (इच्छति), -एष्टा, सह् (सहते) सोढा इत्यादीनि रूपाणि (६), सहवहोः अकारस्योकारे कृते ढलोपे च सोढा-वोढा (७), इडागमे च कृते इष्-एषिता, सह्-सहिता, इत्यादीनि रूपाणि (८), युवोः अनाकौ आदेशौ कृत्वा भू (भवति) इत्यस्य भावकः, तादृशानां च देववत् रूपाणि भवन्ति (९), नाम्युपधात् ज्ञा (जानाति) धातोः च कर्तर्यर्थे क (अ) प्रत्यये कृते भिद्-भिदः ज्ञा-ज्ञः इत्यादीनि रूपाणि (१०), चकारग्रहणे धृ- धरति, कृ-किरति इत्यादीनां ध्रः, किरः इत्यादीनि (११), पच् (पचति), नन्द (नन्दति), ग्रह् (गृह्णाति) धातूनां अ-यु-णिनि प्रत्ययाःभवन्ति, अतः पचः, पतः तरः, देवः इत्यादीनि रूपाणि (१२-१३), चर्-चल्-इत्यादीनां धातूनां द्वित्वे अक् (अ) आगमे हनोर्घनादेशे चराचरः घनाघनः इत्यादीनि (४४) (१४), देव-गाह इत्येतेषां टित्कृते ईबन्तत्वे (स्त्रिलिङ्गत्वं) निपात्यते (१५), यु-प्रत्ययस्य अनादेशे कृते नन्द (नन्दयति) इत्यस्य नन्दनः दुष् (दूषयति) इत्यस्य दूषणः इत्यादि रूपाणि (१६-२०) णिन् (३) प्रत्यये कृते ग्राहयतीति ग्राही इत्यादि रूपाणि (२१-२२), दृश् (पश्यति) (४५) इत्यादि धातूनां श (अ) प्रत्यये कृते (४६) पश्यः, जिघ्रः इत्यादीनि रूपाणि (२३-२५) ज्वलादि धातूनां णः (अ) प्रत्यये कृते ज्वालः, चालः इत्यादीनि रूपाणि (२६), धातोः कर्मण्युपपदे अण्-प्रत्यये कुम्भं करोतीति कुम्भकारः इत्यादयः (२७-२८), शूद्र-शब्दस्य च व्युत्पत्तिः (२७-२९), नाम्न्युपपदे डः (अ) प्रत्यये गिरौ शेते इति गिरिशः इत्यादीनि रूपाणि (३०), उरगः, -उरङ्गः (३१), विहगः - विहङ्गः (३२) भुजगः- भुजङ्गः, तुरगः - तुरङ्गः इत्यादि (३३), अ-टौ-प्रत्यययोः कवचहरः, अस्थिहरः इत्यादीनि (३४), इ-ख-खि (इ) प्रत्ययेषु परेषु फलेग्रहिः, रजोग्रहिः इत्यादीनि (३५-४०), देवापिः, वातापिः इत्यादयः (४१) करीषङ्कषः,कूलङ्कषः इत्यादीनि रूपाणि (४२-४६), भृञ् (बिभर्ति) धातोः खि (इ) प्रत्यये कृते अशितम्भवम्, अशितंभवः, तुरङ्गमः, भुजङ्गमः, इत्यादीनि (४७-५१), द्विषन्तपः, भगन्दरः परन्तपः इत्यादयः निपातिताः (५२-५३) (४७), सर्वसहः रथन्तरम् इत्यादयः (५४-५५), आत्मम्भरिः, उदरम्भरिः (५६), जनमेजयः इत्यादयः, खश्-प्रत्यये कृते ललाटन्तपः, उग्रम्पश्यः इत्यादीनि रूपाणि (५७-६०), पण्डितंमन्यः इत्यादीनि, मुञ्जन्धयः, कुलन्धयः एवं नाडीन्धमः इत्यादीनि रूपाणि (६१-७१), भजां विण् (वि) प्रत्यये कृते अर्धभाक्-ग्-भारवाड् इत्यादि (७२-७३), अभूततद्भावे-अर्थे आढ्यङ्करणम्, शुक्लीभावः,

मधूकृतम् इत्यादीनि रूपाणि (७४-७८), उन्मनीभावः सुखाकरोति (७९)। आकारान्त धातोः मनिप् (मन्) क्वनिप्-वनिप् प्रत्ययेषु परेषु सुदामा, घृतपावा, घृतपीवा (४८) इत्यादीनि रूपाणि (८०-८२), सो (स्यति)-सितः, स्था (तिष्ठति)-स्थितः इत्यादीनि रूपाणि (८३), धा (दधाति) गै (गायति), इत्यादीनां सुधीवा इत्यादीनि (८४), भूरिदावाः इत्यादि रूपाणि (८५), अवावा अवावरी इत्यादीनि रूपाणि (८६), सुत्वा धावा इत्यादीनि रूपाणि (८७) प्रातरित्वा इत्यादयः (८८), सर्वेषां धातूनां क्विप् प्रत्यये कृते कर्मकृत्, अग्निचित्, तत्ववाट् इत्यादीनि रूपाणि (८९-९३ अब), गम् (गच्छति) इत्यादीनां जगत् इत्यादीनि (९३ कड-९५), उपानत् इत्यादि रूपाणि (९६-९७), इच्छादर्शक सप्रत्यये कृते कटचिकीः इत्यादि रूपाणि (९८-९९) उपमानकार्ये दृश् (पश्यति) धातोः तादृशः तादृक्षः (क्विप्), अन्यादेशः कीदृशः कीदृक् कीदृक्षः , इदृक्, इदृशः भवादृक्षः, मादृशः, सदृक् इत्यादीनि रूपाणि,(१००-१०४), अतीतार्थे अग्निष्टोमयाजी, शीलार्थे उष्णभोजी, हन् (हन्ति) धातोः निन्दार्थे पितृघाती, यजेः करणे यज्वा इत्यादीनि रूपाणि भवन्ति (१०५. १०८)

## निष्ठा प्रक्रिया

धातोः अतीतार्थे क्त - क्तवतु प्रत्ययौ स्तः। क्तवतु (तवत्) प्रत्ययः कर्तर्यर्थे एवं क्त(त) प्रत्ययः भावे कर्मणि च प्रयोगे उपयुज्येते इति सोदाहरणं (४९) व्यारव्याय (१०९-११०), भावे प्रयोगे क्त प्रत्ययः क्लीबे भवति, अतः क्षिप्तम् - भूतम्-गतम्-स्थितम् इत्यादीनि रूपाणि (१११), भावशब्दस्य लक्षणम् (५०) गत्यर्थकाकर्मक धातूनां गङ्गागतः इत्यादीनि रूपाणि (११३) झसादि कृत्प्रत्यये परे ञमान्त धातूनां शान्तः दान्तः इत्यादीनि रूपाणि (११४) सेट् धातूनां विकल्पेन प्रद्योतितः - प्रद्युतितः इत्यदीनि रूपाणि (११५), भूतः - वृतः -श्रितः इत्यादीनि रूपाणि (११६), अद् (अत्ति) धातोः जघु (जघ्) आदेशे जग्धम्, जीर्णम् - झीर्णम् - लूनः - भुग्नः इत्यादीनिरूपाणि (११७-११९) सूनः - दूनः इत्यादीनि रूपाणि (१२०) पीतः इत्यादीनिरूपाणि (१२१) त्राणः-त्रातः, निर्वाणः- निर्वातः इत्यादीनिरूपाणि (१२२-१२३), सम्- परि-उप एतेषामुपसर्गाणां परे कृ (करोति) धातोः भूषणार्थे सुट् (स्) आगमे कृते संस्कृतम् - परिष्कृतम् , उपस्कृतम् इत्यादीनि रूपाणि (१२४) , दा धातोः दत्त आदेशे दत्तम् - प्रदत्तम् (१२५), यज् (यजति) धातोः सम्प्रसारणे कृते इष्टम् (१२६), टुवप् धातोः उप्तम्, वह् (वहति) धातोः ऊढः, उदयार्थे उदितम् - संवितम् - उक्तम् इत्यादीनि रूपाणि (१२७-१२८), वस् (वसति) धातोः उषितः, क्षुध् (क्षुध्यति) धातोः क्षुधितः इत्यादीनि रूपाणि, जन् (जायते) धातोः जातः पच (पचति) धातोः पक्वः, शुष् (शुष्यति) धातोः शुष्कः (१३०) इत्यादीनि रूपाणि साधितानि।

## ॥ क्वस्वादि प्रक्रिया ॥

परोक्ष भूतकालार्थे धातोः क्वसु -(वस्), कान (आन) - प्रत्ययौ स्तः। चक्रवान्, चक्राण इत्यादीनि रूपाणि (१३१), एकस्वराणां, द्वित्वयुक्तानां [५१] आकारान्तानां च, दा (ददाति)- ददिवान् इत्यादीनि रूपाणि (१३२) दृश् (पश्यति) - ददृशिवान् - ददृश्वान्, गम्यमाने - क्रियापदे पचमानः, आसीनः, ईप् प्रत्यये तुदन्ती तुदती, पचती -पचन्ती, दीव्यन्ती इत्यादीनि रूपाणि (१३३-१३६) जक्षत्-ददत् इत्यादीनि रूपाणि (१३७) विकल्पेन नुमागमे जक्षन्ति जक्षति (१३८-१३९), अत्रभवान् - तत्रभवान् इत्यादीनि रूपाणि (१४०) शीलेऽर्थे तृन् (तृ) - प्रत्यये कर्ता हर्ता (१४१) इष्णुः, स्नु प्रत्यये ग्लास्नुः, जिष्णु, अलङ्करिष्णुः निराकरिष्णुः स्थास्नुः, क्नु प्रत्यये विष्णुः त्रस्नुः, गृध्नुः इत्यादीनि रूपाणि (१४२-१४६)षाक (आक) - प्रत्यये जल्पाकः, भिक्षाकः, वराकः इत्यादिनी रूपाणि (१४७) सन् (स) प्रत्यये चिकीर्षुः आशंषुः भिक्षुः इत्यादीनि रूपाणि (१४८), उकण् (उक) प्रत्यये लाषुकः पातुकः इत्यादीनि रुपाणि (१४८-१५०), आलु प्रत्यये स्पृहयालुः गृहयालुः इत्यादि प्रयोगाः (१५१),र प्रत्यये नम्रः कम्प्रः कम्रः, इत्यादीनि रूपाणि (१५२), घसादि धातूनां क्मर (मर) - प्रत्यये घस्मरः, सृमरः इत्यादीनि रूपाणि, (१५३), भिद् (भिनत्ति), विद् (वेत्ति), छिद् (छिनत्ति) धातूनां कुरच् (उर) प्रत्यये भिदुरः, विदुरः छिदुरः इत्यादीनि रूपाणि (१५४) भास (भासते) इत्यादि धातूनां घुर (उर) प्रत्यये भासुरः इत्यादि रूपाणी (१५५) यज् (यजति)इत्यादिनां यङ् (क्रियातिशये) उक प्रत्यये यायजूकः इत्यादि रूपाणि (१५६), जागृ (जागर्ति) धातोः जागरुकः इत्यादि रूपाणि (१५७) इण् (एति) इत्यादीनां क्वरप् (वर) - प्रत्यये तुगागमे च इत्वरः, गत्वरः इत्यादीनि रूपाणि (१५८), भी (बिभेति) इत्यादीनां धातूनां भीरूः - भीरुकः भीलुकः इत्यादीनि रूपाणि (१५९) शृ शृणाति एवं वन्द् (वन्दते) धात्वोः शरारुः वन्दारुः [५२] इत्यादि रूपाणि (१६०), स्था (तिष्ठति) इत्यादीनां धातूनां स्थावरः, ईश्वरः इत्यादि रूपाणि (१६१), शीलेऽर्थे भूतकाले आकारान्त - ऋकारान्त धातूनां कि (इ) - प्रत्यये कृते पपिः ददिः, वव्रिः आजह्रिः (१६२-१६४) इत्यादीनि रूपाणि साधितानि।

## ॥ अथोणादि प्रक्रिया ॥

सर्वेषु कालेषु उणादि प्रत्ययाः संज्ञावाचकत्वेन प्रयोक्तव्याः इति (१६५) व्याख्याय कृ (करोति), पा (पाति), वा (वाति) इत्यादि धातूनां उण् प्रत्यये कारुः पायुः मायुः इत्यादीनि रूपाणि (१६६), धा (दधाति)- धातुः, अव (अवति)- ओतुः इत्यादीनि रूपाणि (१६७) मुकागमे ओम् (प्रणवः) (१६८), बृह् (बृहति) अत (अतति) इत्यादि धातूनां ब्रह्म, आत्मा इत्यादीनि रूपाणि (१६९) ऋ (ऋच्छति), स्तु (स्तौति) पद् (पद्यते) इत्यादि धातूनां अर्मः, स्तोमः पद्मम् इत्यादि रूपाणि (१७०-१७१), भी (बिभेति) एवं धू (धूयते) इति धात्वोः भीमः , धूमः, धु (धुनाति) धातोः धूलिः इत्यादीनि रूपाणि (१७२), भविष्यदर्थे णिन् (इन्) प्रत्यये आगामी भावी इत्यादीनि रूपाणि (१७३), वर्तमानार्थे गम् (गच्छति) धातोः डो (ओ) प्रत्यये कृते गोः, ग्लै (ग्लायति) नुद् (नुदति) धात्वोः ग्लौः, नौः इत्यादीनि रूपाणि साध्यन्ते (१७४)।

स्त्रीलिङ्गविवक्षायां स्त्यै (स्त्यायते) धातोः स्त्रीः, लक्ष् (लक्षयति) धातोः लक्ष्मीः इति रूपाणि (१७५) , राज् (राजते) इत्यादि धातूनां राजा, तक्षा, धन्वा इत्यादीनि रूपाणि (१७६), वच् (वक्ति) इत्यादीनां पचः, वचः, तपः इत्यादिनी रूपाणि तथा च त्र प्रत्यये यन्त्रम् इत्यादी प्रयोगाः, अर्च् (अर्चति) इत्यादीनां इस प्रत्यये अर्चि, रोचिः इत्यादीनि रूपाणि (१७८) ईस् - मन् - त्रन् (त्र) क्विप् प्रत्ययेषु छादयति - छदिः छद्म - छत्रम् - तनुच्छिद् इत्यादि रूपाणि (१७९) त्रप् (त्रपते), वप् (वपते) इत्यादि धातूनां उस् - प्रत्यये त्रपुः, वपुः इत्यादि रूपाणि (१८०) अव(अवति) इत्यादीनां ई-प्रत्यये अवीः , तरीः इत्यादीनि रूपाणि (१८१) भिदेलमम्, पचेलिमः इत्यादीनि च रूपाणि साधितानि।

## । अथ तुमन्त प्रक्रिया ।

तदर्थे भविष्यदर्थे काल, समय, वेलासु च धातोः तुमुन् (तुम्) प्रत्यये भोक्तुम्, सुस्तोतुम्, वुण् (वु - अक) प्रत्यये दर्शकः इत्यादि प्रयोगाः (१८४-१८६) माने घञ् - प्रत्यये त्यागः, भावः, दायः - पायः इत्यादि रूपाणि (१८७) , अकर्तर्यर्थे संज्ञावाचके च धञ् (अ) प्रत्यये - प्रत्याहारः, विकारः इत्यादीनि रूपाणि (१८८), रञ्ज् (रज्यति) धातोः रागः - रञ्जनम् इति (१८९), चि (चिनोति) - चयः, जयः, लवः, गृ (गिरति) गरः कृ (किरति) - करः इति रूपाणि (१९०), मद् (माद्यति) इत्यादि धातूनां मदः , पणः इत्यादीनि रूपाणि (१९२), हिंस् धातोः वर्णविपर्ययेन सिंहः (५३) (१९३), हन् (हन्ति) धातोः घन- ओदेशे दधिघनः सैंधवघन इत्यादि रूपाणि (१९४-१९५) वधादेशे वधः (१९६अब) वेपनम्-वेपनम्-वेपथुः इत्यादि रूपाणि (१९६कड), त्रिमक् (त्रिम) -

प्रत्यये कृत्रिमः इत्यादीनि रूपाणि (१९७) यज् (यजति), याच् (याचते) इत्यादीनां नट् (न) - प्रत्यये विश्नः, प्रश्नः, स्वप्नः इत्यादीनि रूपाणि (१९८-१९९) सोपसर्गयोः दा -धा- धातोश्च आदिः एवं आधिः, कर्मण्यर्थे जलधिः पयोधिः इत्यादि रूपाणि (२००), भाव क्रियार्थे युट् (यु-अन) - प्रत्यये कृ (करोति) करणम्, दिव् (दिव्यति) - देवनम् इत्यादीनि रुपाणि (२०१-२०२) ,उत् उपसर्ग पूर्वकं स्था (तिष्ठति), स्तम्भ् (स्तम्भति) धात्वोश्च भावे प्रयोगे उत्थानम् - उत्तम्भनम् इति रुपाणि, साधने - आधारार्थे च युट् प्रत्यये (यु-अन) (पचति) - पचनः स्त्रीत्वे पचती इति रूपाणि (२०३-२०४) ईषत् , दुः, सु - उपपदानां भावक्रियार्थे खल् (अ) एवं युट् (यु-अन)-प्रत्यये च ईषत्भवः ईषत्पानः एवं ईषत्करः, दुष्करः, सुकरः इति च रूपाणि (२०५-२०६) सिध्यन्ति।

## ॥ "कृत्यप्रक्रिया" ॥

भावे कर्मण्यर्थे च धातोः तव्य-अनीयौ प्रत्ययौ स्तः। अतः भू धातोः भावेऽर्थे भवितव्यम्, कर्मण्यर्थे च भवनीयम् - कर्तव्यः - करणीयः इत्यादि (२०७), ग्रह् (गृह्णाति) धातोः ईट् (ई) आगमे ग्रहीतव्यम् - वरीतव्यम् इत्यादि प्रयोगाः (२०८), स्वरान्त धातूनां य - प्रत्यये कृते चि (चिनोति) - चेयम्-नेयम्-चेतव्यः - नेतव्यः इत्यादि रूपाणि (२०९) शक्यार्थे क्षय्य-जय्यौ निपातितौ (२१०), अकारोपध पवर्गान्त एवं शक् (शक्नोति) इत्यादि धातूनां य-प्रत्यये जप्यम्-शक्यम्-शंस्यम् सह्यम् इत्यादि रूपाणि (२११-२१२), आकारान्त धातूनां य-प्रत्यये गेयम्-पेयम् इत्यादि रूपाणि (२१३), ऋकारान्त - हसान्त धातूनां ध्यण् (य)-प्रत्यये कार्यम्-वाह्यम् इति रूपाणि, एवं रुज् धातोः रोग्यम् इत्यादीनि (२१४), वच् (वक्ति) धातोः वाक्यम्-वाच्यम्, पच् (पचति)-पाक्यम्-पाच्यम् इत्यादीनि, एवञ्च याज्यम्-रोच्यम्-त्याज्यम्-पूज्यम् इत्यादीनि (२१५-२१७), आवश्यकार्थे उकारान्त धातोः लाव्यम् (२१८), कृत्य प्रत्ययेषु काम-मनस्-एतयोः परयोः अवश्यकार्यम्, भोक्तुकामः श्रोतुमनाः, सहितम्-संहितम्, सततम्, -संततम् इत्यादीनि रूपाणि भवन्ति। (२१९-२२०) ऋकारोपधत्वात् धातूनां क्यप् (प)-प्रत्यये कृत्यम्-नृत्यम् इत्यादि रूपाणि (२२१), संज्ञोपपदे भू धातोः ब्रह्मभूयम् इति, एवं भिद्यः-उध्यः इति, नद्यर्थके (२२२), कृ (करोति), वृष् (वर्षति), च धात्वोः विकल्पेन कृत्यम् - कार्यम् वृष्यम्-वर्ष्यम् इति (२२३), तव्यादि प्रत्ययाः अर्हविधौ द्रष्टव्यः -दर्शनीयः अध्येतव्यः (२२५), निदिधासितव्यः, विजिज्ञासितव्यः इत्यादि रूपाणि (२२६) साधितानि।

## ।। "स्त्रीप्रक्रिया" ।।

स्त्रीत्वे यजादिधातूनां क्यप् (प) प्रत्यये इज्या, आस्या, मन्या, पत्या इत्यादीनि रूपाणि (२२७-२२८), क्ति (ति) प्रत्यये कृतिः, संज्ञार्थे प्रकृतिः इति रूपाणि, (२२९). षिदिदादीनां, भिदादीनां च धातूनां अङ् (अ) प्रत्यये, आबन्ते च पचा, छिदा,जरा इत्यादीनि रूपाणि (३३०), दीर्घान्तानां हसान्तानां च धातूनां अ प्रत्यये एधा, पुत्रीया, चिकीर्षा इति रूपाणि, ञकारान्तानां आसादीनां यु (अन) प्रत्यये अर्थना-आसना इत्यादीनि रूपाणि (२३१-२३३),धातूनां निर्देशे इक् (इ), श्तिप् (ति) प्रत्ययौ स्तः, यथा पच्-पचिः-पचतिः इति रूपाणि, समानकर्तृत्वे पूर्वसमयनिर्देशे क्त्वा (त्वा) प्रत्यये स्नात्वा इत्यादीनि रूपाणि, सेट् धातूनां विकल्पेन वृत् (वर्तते)-वर्तित्वा-वृतित्वा इत्यादि रूपाणि (२३४-२३५) निषेधार्थकयोः अलम्-खलु शब्दयोः परयोः क्त्वा (त्वा) प्रत्यये अलंभुक्त्वा इत्यादीनि रूपाणि, एवं उदित् धातूनां विकल्पेन इडागमे इष् (इच्छति)-एषित्वा-इष्ट्वा इति रूपाणि (२३६), पूर्वकाल विषये समानकर्तृत्वे (सोपसर्गस्य) धातोः 'प्रणम्य' इत्यादीनि रूपाणि (२३७), नञ्पूर्वे अकृत्वा इति, क्यप् (य) प्रत्यये पूर्वलघुस्वरयुक्त ञ्यन्त धातोः परिणमय्य इत्यादीनि, क्यप् (य) प्रत्यये च सम्मील्य इत्यादि रूपाणि (२३८-२३९), वारंवारम् (पौनः पुन्ये) अर्थे णम् (अम्) प्रत्यये, पदस्य च द्वित्वे भोजंभोजम् इत्यादि रूपाणि, कथ्-इत्यादि धातूनां स्वार्थे णम् (अम्) प्रत्यये कथङ्कारम् इत्यादि रूपाणि (२४०-२५१) भवन्ति।

वर्णनिदर्शनार्थं कार-प्रत्यये अकारः इत्यादीनि, किन्तु र वर्णस्य इफ प्रत्यये विकल्पेन कृते रकारः- रेफः (५५) इत्यादीनि रूपाणि (२४२-२४३)।

उपसंहारं कुर्वन्तो महोपाध्याय-विनयसागराः स्पष्टयन्ति यथा सरोवरेषु भ्रमरश्रेणिः शोभते तथैव भोजव्याकरणपद्येषु अन्तर्भूतानि सूत्राणि शोभन्ते (२४४) ।

अन्ते च शेषाणां शब्द (धातु) रूपाणां सिद्धिः लोकात्- अन्यव्याकरणात् करणीया इति प्रमाणयन् यथा मातः इत्यादीनां (५६) इति दर्शयित्वा सरस्वत्या ग्रन्थदीर्घत्वभयात् इदमन्तिमं उक्तम् (२४५) ।

अनया रीत्या श्रीपाणिनेः व्याकरणमाश्रित्य विनयसागरैः कतिचित् प्रयोगाः साधिताः (२४६) ततः भोजव्याकरणस्य पठन-पाठन प्रयोजनं पुरःस्थापयति (२४७) निजधर्मगुरुपरम्परां प्रणमन्तः

लिखन्ति (२४८-२४९) भोजव्याकरणस्य अन्तिमं मङ्गलाचरणं विनयसागरैः श्री अनुभूतिस्वरुपा चार्याणामन्तिममङ्गलश्लोकं स्वीकृत्य प्रथितं दृश्यते यत्र देवदानवमानवैः भ्रमराणां पद्मरसपानमिव यस्य चरणकमलसेवनं अहर्निशं क्रियते तस्य हयग्रीवावतारिणः कमलाकरस्य श्री विष्णोः आशीर्वचनं ग्रथितं वर्तते-तद्यथा -

''अवताद्वो हयग्रीवः कमलाकर ईश्वरः ।
सुरासुरनराकार - मधुपापीतपत्कजः ॥ इति ॥ ३.२५० ॥ (५७)।

## (ई) 'साहित्यरत्न' गणिवर्याणां प्रधानसम्पादक श्री कलाप्रभसागरजी महात्मनां "खुलासो" (दूरुक्तचिन्ता)

"शङ्खेश्वराख्यमिह तीर्थमिदं हरेश्च" (१, ७.६७) (अनुवादकस्य प्रस्तावना पृ. १४)

अस्य पद्यस्यार्थः अतीव सरलतया अवबुध्यते यत्-हरि शब्दस्यार्थः श्रीकृष्णः- वासुदेवः इति भवति । अर्थात् । श्री शङ्खेश्वराख्यं -शङ्खेश्वरपार्श्वनाथस्य तीर्थं श्रीकृष्णस्य निमित्तेन सञ्जातं वर्तते । श्रीकृष्णजरासंङ्धयोर्मध्ये युद्धसमये जरासङ्ध द्वारा विद्यायाः प्रयोगः कृतस्तेन श्रीकृष्णस्य सैन्यं जरया (वृद्धावस्थया) जर्जरितवत् बलहीनं (मूर्च्छितं) अभवत् । तदा श्रीकृष्णेन श्रीनेमनाथभगवतः निदेशेन अष्टमतपसः (उपवासत्रयस्य) आराधनं कृतम् । ततः श्री धरणेन्द्रदेवस्य प्राकट्यमभवत् । तदनन्तरं तस्मै महत्प्रभावयुक्तस्य श्री पार्श्वनाथप्रभोः दिव्या प्रतिमा प्रदत्ता । यस्याः प्रतिमायाः स्नात्रवारिणः सेचनेन मूर्च्छिताः सर्वे सैनिकाः पुनः स्वास्थ्यमलभन्त । श्रीकृष्णेन शत्रुसैन्योपरि अपि एतज्जलस्य, सेचनं कृतम् । तेन कारणेन ते सर्वेऽपि सैनिकाः पुनः स्वस्थाः बभूवुः श्रीकृष्णस्य सैन्यं पुनः सन्नद्धमभवत् । युद्धे च विजयो जातः । शत्रुश्च पराजितः । तस्यां भूमावुपरि श्रीकृष्णेन विजयस्य प्रतीकरूपेण शङ्खध्वनिः कृतः । अनेन शङ्खनादेन तत्र शङ्खपुरं नाम नगरं उदभवत् । तत्र च श्रीपार्श्वनाथप्रभोः अलौकिकायाः एवं दिव्यायाः प्रतिमायाः कृते भव्यं तीर्थरूपं जिनालयं निर्मापितम् । तत्कालादारभ्य तत्स्थानं श्री शङ्खेश्वरपार्श्वनाथ नाम्ना प्रसिद्धमभवत् ।

दिनाङ्क : ५-७-८५, अहमहावाद ।

लिखितम्
सम्पादकश्री कलाप्रभसागरजी म. सा.
महात्मना -

किन्तु उपरि निर्दिष्टायां 'खुलासो' इति नामधेयायां दुरुक्तचिन्तायां कानिचित् चिन्त्यस्थानानि सन्ति । तानीत्थं -

१. नवमतीर्थङ्करस्य समये शङ्खेश्वरतीर्थस्य उद्भवः ।

२. द्वाविंशतितमस्य तीर्थङ्करस्य श्री नेमनाथस्य समयः ।

महाभारतयुद्धस्य समकालीनः । श्रीनेमनाथः श्रीकृष्णस्य पूर्ववर्ती परवर्ती वा इत्यस्मिन् विषये कुत्रापि ऐतिहासिकं प्रमाणं न प्राप्यते ।

३. जरासङ्धस्य नेमिनाथस्य च कालनिर्णयोऽपि परस्परं विसंवादितः ।

४. तत्रैव वदतोव्याघातः - विद्याप्रयोगः केन कुत्र कृतः ।

ग्रन्थद्वये स्नात्रजलप्रभावेन श्रीकृष्णसैन्यस्य विसंज्ञा दूरीकृता, किन्तु अपरस्मिन् ग्रन्थे (त्रिषष्टीशलाकापुरुषचरितम्) श्रीकृष्णसैन्यस्य भयमेव अरिष्टनेमिना शङ्खध्वनिं कृत्वा दूरीकृतम् ।

अत्र आवश्यकाः ग्रन्थांशाः अधः प्रस्थाप्यन्ते नीरक्षीरविवेकार्थम् ।

## (१)

श्री अमरचन्द्रसूरिवरविरचितं श्री तीर्थङ्करचरितम् (पृ. ७८ तः ८१)
श्री जैन आत्मानन्द ग्रन्थमाला नं ९०। प्र. श्री जैन आत्मानन्दसभा - भावनगर,
गांधी वल्लभदास त्रिभुवनदास (साहित्यभूषणः), वीर सं. २४७८, विक्रम सं. २००८ आत्म सं. ५५

भरतक्षेत्रे जम्बुद्वीपे कुशार्तदेशे मण्डनरूपं शौर्यं नाम नगरमासीत् । तत्र समुद्रविजयो नाम हरिवंशोत्पन्नः नृपः राज्यमकरोत् । तस्य शिवादेवी नाम्नी वल्लभा आसीत् । कार्तिकमासस्य कृष्ण द्वादश्यां चित्रा नक्षत्रदिने अपराजित विमानात् त्रयस्त्रिंशत्सागरोपममायुष्यं क्षयितं, तदा शङ्खनाम्नः नृपस्य जीवः च्यवितो भूत्वा शिवादेव्याः उदरे अवतीर्णः । नवमे मासे व्यतीते श्रावणमासस्य शुक्लपञ्चम्यां मध्यरात्रौ चित्रानक्षत्रदिने कन्यारशिगते चन्द्रे शिवादेवी अञ्जनवत् शरीरकान्तियुक्तं, शङ्खस्य लाञ्छनचिन्हयुक्तं एवं हरिवंशस्य मौलिसमानं द्वाविंशतितमं तीर्थङ्कररूपं पुत्रं प्रासूत । यदा

सः मातुः उदरे आसीत् तदा तस्य जनन्याः स्वप्ने रिष्टमया चक्रधारा दृष्टा आसीत् । अतः तस्य जनकद्वारा तस्याभिधानमरिष्टनेमी'ति कृतम् । अयमेव श्रीनेमिनाथः इति स्पष्टीभवति ।

गच्छता कालेन यौवनं प्राप्तेन अनेन कुमारेण वर्षाणां त्रिशतं व्यतीतम् । पितुराज्ञामुल्लङ्घ्य तेन पाणिग्रहणं नकृतम् । अत्र यशोमत्याः जीवः अपराजित विमानात् स्खलितो भूत्वा मथुरानगर्यां हरिवंशे समुत्पन्नस्य उग्रसेननृपस्य धारिणीमहिष्याः उदरे सञ्जातः । तेन राजीमती नाम्नी पुंत्री बभूव । मदनवनिता सुरूपा सापि यौवनं प्राप्ता । अस्याः राजीमत्याः विवाहं नेमिनाथेन सह कर्तुं तस्याः पितृभ्यां प्रार्थना कृता । विवाहार्थं गतेन नेमिनाथेन गोष्ठे पीडितानां प्राणिनां दयनीयां वाचं श्रुत्वा सारथिः आज्ञापितः, सर्वे च प्राणिनः मोचिताः । राजीमतीं त्यक्त्वा स्वरथः प्रत्यावृतः । राज्यकार्यभारचिन्तां विहाय सः उत्तरकुरु शिबिकामारुह्य नगर्याः बहिः निर्गतः । उज्जयन्तपर्वतोपरि सहस्त्राम्रवणाऽरण्यं गत्वा श्रावणमासस्य शुक्लाष्टम्यां चित्रानक्षत्रगते चन्द्रे तद्दिनस्य पूर्वभागे सहस्रनृपैः सह षष्ठतपसि तत्परेण अनेन नेमिनाथेन प्रव्रज्या गृहिता । अन्यस्मिन् दिने गोष्ठे वरदत्तनृपस्य गृहे श्रीनेमिनाथस्य व्रतस्य परमान्तेन पारणामभवत् । चतुःपञ्चाशत् दिनपर्यन्तं अन्यत्र स्थाने विहारं कृत्वा श्रीनेमिनाथः पुनः रैवतकपर्वतोपरि सहस्त्रामवणोद्यानं समागतः । तत्र वेतसवृक्षस्य अधस्तात् प्रतिमारूपेण स्थितः श्रीनेमिनाथप्रभुः आश्विनमासस्य चित्रानक्षत्रगते चन्द्रदिने, पूर्वभागे-अष्टमतपः द्वारा केवलज्ञानं प्राप्तवान् । श्रीनेमिनाथप्रभोः चैत्यवृक्षः १२० धनुः प्रमाणं उन्नतः आसीत् ।

## (२)

जैनतीर्थ सर्वसङ्ग्रह : (गुज.) प्रथमो भागः, प्रथमः खण्डः पृ. ४७, प्र-. शेठ आणन्दजी-कल्याणजी, झवेरीवाड, अहमदावाद,

वि. सं. २०१०, वीर सं. २४८० खिस्ताब्दः १९५३ ।

**शङ्खेश्वरः** - इदं तीर्थक्षेत्रं गुर्जरदेशस्य राधनपुर नाम्नि स्थाने ग्रामं वर्तते । प्राचीन लेखेषु एवं हस्तप्रतेषु शङ्खेश्वर तीर्थक्षेत्रस्य उल्लेखो प्राप्यते । तस्यापरं नाम 'शङ्खपुरम्' इति । किन्तु किंवदन्त्यनुसारेण यदा शङ्खेश्वरपार्श्वनाथस्य तीर्थमहिमा विस्तृतोऽभवत् तदा अस्य क्षेत्रस्याभिधानं शङ्खेश्वर इति प्रचलितं बभूव । इदमभिधानं अधुनाऽपि अतीव प्रभावभूतं वर्तते, येन कारणेन अद्यापि शङ्खेश्वर पार्श्वनाथस्य मन्दिराणि तत्र अनेकेषु स्थानेषु दृश्यन्ते । तस्य शास्त्रीयमभिधानं 'शङ्खपुर' मिति

सत्वात् आधुनिक रचनास्वपि तस्य नामोल्लेखः कृतो दृश्यते ।

जैनग्रन्थानां कथनानुसारेण अतिप्राचीनकाले 'आषाढी' नाम्ना श्रावकेन चारूपे, स्तम्भपुरे एवं शङ्खेश्वरे मूर्तयः प्रतिष्ठापिताः । जरासङ्धश्रीकृष्णयोः युद्धमध्ये जरासङ्घेन श्रीकृष्णस्य सैन्योपरि जरा प्रक्षिप्ता । अतः श्रीअरिष्टनेमि भगवता अस्य श्रीशङ्खेश्वर पार्श्वनाथ भगवतः (पवित्र) स्नात्र जलस्य सेचनं सैन्योपरि विहितम् । अनेन स्नात्रजलसेचनप्रभावेन सर्वे उपद्रवाः प्रशमं गताः । एतादृशाः अनेकाः किंवदन्त्यः जैनशास्त्रस्य अनेकेषु ग्रन्थेषु एवं लोकजिह्वास्वपि गीयन्ते । अस्याः शङ्खेश्वमूर्तेः माहात्म्यं अपूर्वं वर्तते । वैक्रमस्य ११२५ तमे वर्षे महाअमात्येन सज्जनशाहेन शङ्खेश्वरक्षेत्रे मन्दिरं प्रतिष्ठापितं, तदारभ्य श्रीशङ्खेश्वरमहातीर्थस्य ऐतिहासिकसमयः प्रारभ्यते ।

## (३)

'त्रिषष्ठिशलाकापुरुषचरितम्' पर्व - ८ - ९ (भाषान्तरम्) चतुर्थावृत्तिः । कलिकालसर्वज्ञ श्रीमान् हेमचन्द्राचार्य विरचितम् । प्र. - (प्रकटकर्ता) श्री जैनधर्मप्रसारक सभा, भावनगर । मु. शाह गुलाबचन्द लल्लुभाई, श्री महोदय प्रीन्टींग प्रेस, दाणापीठ, भावनगर, वीर सं. २४६५, वि. सं. १९९५ ।

श्री कृष्णजरासङ्धयोः युद्धे जरासङ्घस्य सैन्यं द्वारा श्रीकृष्णसैन्यं विनष्टप्रायमभवत् । यदा जरासङ्घःश्रीकृष्णोपरि प्रहारं कर्तुमधावत् तदा ''श्रीकृष्णः पञ्चत्वं गतः '' इति सर्वत्र ध्वनिः विस्तृतो बभूव । तच्छ्रुत्वा सारथिना मातलिना अरिष्टनेमिं प्रति उक्तं यत्-हे स्वामिन् ! अष्टापदस्याग्रे बालहस्तिवत् भवदग्रे जरासङ्धः तुच्छः एव । किन्तु जरासङ्धः उपेक्षां कर्तुं न योग्यः । अतः हे जगन्नाथ ! तव लीलादर्शनं कारयतु । इति सूतमातलिवचः श्रुत्वा श्रीनेमिनाथेन विना कोपेन स्वहस्ते पौरन्दर नाम शङ्खं धृत्वा मेघघोषवत् शङ्खनादः कृतः । इदं महाशङ्खध्वनिं श्रुत्वा शत्रवः क्षुब्धाः बभूवुः, एवं श्रीकृष्णसैन्यं पुनः युद्धाय सन्नध्धं बभूव ।

(४)

प्रकटप्रभावी पार्श्वनाथः एवं जैनतीर्थमाला (गुज.) पृ. ११२। प्रका.- जैन सरती वांचनमाला, भावनगर, सं. १९८५. आश्विन शुक्ल पञ्चमी ।

गुर्जरराज्यस्य राधनपुरक्षेत्रे शङ्खेश्वरपार्श्वनाथस्य महत्तीर्थं वर्तते। नवम तीर्थङ्कर समये आषाठी-नाम्ना श्रावकेन सा प्रतिमा प्रतिष्ठापिता आसीत् । तदनन्तरं द्वाविंशतितमतीर्थङ्कर श्रीनेमिनाथस्य वचनानुसारेण प्रतिवासुदेवद्वारा यादवेषूपरि जरायाः प्रक्षेपणत्वात् तस्याः जरायाः निवारणार्थं श्रीकृष्णवासुदेवेन अष्टमतपः कृत्वा पार्श्वनाथस्य एकाग्रचित्तेन ध्यानं कृतम्। तृतीयायां रात्रौ पद्मावती प्रकटीभूता, प्रतिमा च तस्मै प्रदत्तवती। तस्य स्नात्रजलप्रभावेन सर्वेषां यादवानां जराराक्षसी दूरीभूता। सा प्रतिमा श्रीकृष्णेन शङ्खपुरी नाम्नि नगरे प्रतिष्ठापिता। एवं तत्र शङ्खेश्वरं नाम नगरं जातं, मूर्त्याश्च शङ्खेश्वर-पार्श्वनाथः इत्यभिधानं कृतम्।

## (उ) भोजव्याकरणे प्रयुक्तच्छन्दसाम्-
## अकारादिक्रमेण सलक्षणं निदर्शनम् ।

१. अनुष्टुप् छन्दः श्लोके षष्ठं गुरु ज्ञेयं सर्वत्रलघुपञ्चमम् ।
द्विःचतुः पादयोः ह्रस्वं सप्तम् दीर्घमन्ययोः ॥

उदाहरणानि - १,१.२ / १,१.८ / इत्यादयः । प्रायः पद्यानि
अनुष्टुप् छन्दसा निबद्धानि सन्ति ।

(२) आर्या छन्दः :- यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेऽपि ।
एवं अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥
आर्यागीतिः आर्याप्राग्दलमन्तेऽधिक गुरु तादृक् परार्धमार्यागीतिः ॥

उदाहरणानि - १, १.७ / १, १.२३ / १, १.३४ / १, ३.१ / १, ३.२ / १, ३.३ / १, ५.१० / १, ७.१३ / १, ७.२७ / १, ७.२८ / १, ७.२९ / १, ७.३२ / १, ७.३७ / १, ७.४० / १, ७.५० / १, ७.५१ / १, ७.२२८ / १, ८.६ / १, ८.७ / १, ८.८ / १, ८.२६ / १, ८.२७ / १, ९.८ / १, ९.२३ / १, १०.५० / १, १०.५१ / १, १०.५८ / १, १०.८४ / १, १०.८५ / १, १३.१३ / १, १४.३ / १, १५.४ / १, १५.२८ / १, १५.४० / १, १६.४० / १, १७.९० / १, १७.९३ / १, १८.८ / १, १८.३४ / १, १८.६० / १, १८.६१

२, १.४ / २, १.१७ / २, १.१९ व २, १.२० / २, १.२५ / २, १.२६ / २, १.३८ / २, १.४२ / २, १.६२ / २, १.९३ / २, १.१०८ / २, १.१३५ / २, १.१६५ / २, १.१८४ / २, १.२३० / २, १.२३१ / २, १.२४७ / २, १.२६५ / २, १.२७३ / २, १.२७४ / २, १.३१२ / २, १.३१४ / २, १.३१५ / २, १.३३३ / २, १.३५४ / २, १.३६८ / २, ३७८ / २, २.१२ / २, २.२० / २, २.२८ / २, ३.३८ / २, ३.३९ / २, ३.४६ / २, ४.२९
२, ६.२० / २, ८.१२ / २, १०.२ / २, ११.३७ / २, १२.१० / २, १३.३० / २, १४.१ / २, १४.७ / २, १४.९ / २, १५.१३ / २, १५.१४ / २, १५.१७ / २, १५.२३ / २, १६.७ / २, १६.१८ / २, १७.१ / २, १८.१ / २, १८.२ /

३, १.६ / ३, १.१४ / ३, १.२१ / ३, १.३० / ३, १.७७ / ३, १.८० / ३, १.८८ / ३, १.१४५ / ३, १.१५२ / ३, १.१५६ / ३, १.१६६ / ३, १.६७ / ३, १.१७० / ३, १.१७८ / ३, १.१७९ / ३,१.१८० / ३, १.१८१ / ३, १.२१४ / २, १.९९ / २, १.१२६ / २, १.२३४ / २.१.३१८ / २, १.१४८ ।

गीति - आर्यापूर्वार्धसमं द्वितीयमपि यत्र भवति हंसगते ।
छन्दोविदस्तदानीं गीतिंताममृतवाणीं भाषन्ते ॥

उदाहरणानि - १, १५.७ / १, १५.३० / १, १५.३१ / १, १६.१६ / १, १६.२६ / १, १६.२७ / १, १७.१० / १, १७.९५ / १, १८.६५ /२, १.२८ / २, १.५९ / २, १.६० / २, १.१०४ / २, १.१३० / २, १.१८० / २,७.१६ / २, १६.२९ / २, १७.४५ / ३, १.३४ / ३, १.३५ ।

इन्द्रवज्रा - स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

१, ६.१ / १, १७.३५ / १, १७.३६ / २, १.१ / ३, १.१ / ३, १.२ / ३, १.१६४ / ३, १.२४६ ।

उपजाति :- अनन्तरोदीरित लक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु,वदन्ति जातिष्विदमेव नाम ॥

उदाहरणानि - १, १.१ /१, २.९ /१, ४.२० /१, ५.१ /१, ५.१७ /१, ५.१८ /१, ७.६८ /१, ७.६९ /१, ७.८६ /१, ९.११ /१, १०.१ /१, १५.८ /१, १५.९ /१, १७.१२ /१, १७.१४ /२, १.२ / २, १.६ / ३, १.१४३ / ३, १.१४४ / ३, १.१४७ ।

दोधकम् - दोधकमिच्छति भत्रितयाद् गौ ॥

उदाहरणानि - १, १४.१७ / २, १७.३ ।

मालिनी - न न म य य युतेयं मालिनीभोगिलोकैः ।

उदाहरणानि - १, १.३ / १, १६.८ ।

वसन्ततिलका - ज्ञेयं वसन्ततिलकं त भ जा ज गौ गः ।

उदाहरणानि - १, ७.४६ / १, ७.४७ / १, ७.६६ / १, ७.६७ / १, १८.८६ / १, १८.८७ / २, १८.७ / २, १८.८ / ३, १.२४८ / ३, १.२४९ ।

विद्युन्माला -मो मो गो गो विद्युन्माला ॥

उदाहरणानि - १, ८.७ / १, ८.८ / १, ८.२६ / १, ८.२७ / १, १०.६६ / १, १४.२ / १, १५.३ / ३, १.१२० / ३, १.१७१ / ३, २१६ / ३, १.२२८ ।

वंशस्थबिलम् - वदन्ति वंशस्थबिलं ज तौ ज रौ ।

उदाहरणानि - १, १७.१ / २, १.१५१ / २, १.१५२ / २, १.१५३ / २, १.१५४ / २, १.१५५ / २, १.१५६ / २, १५७ / २, १.१५८ / २, १.१५९ / २, १.१६० / २, १.१६४ / २, १८.३ ।

रथोध्धता - रात्परैर्नलगैः रथोध्धता ।

उदाहरणानि - १, ७.५७ / १, ७.५८

शालिनी - मात्तौ गौ चेच्छालिनी वेदलोकैः ॥

उदाहरणानि - १, ७.८३ ।

शार्दूलविक्रीडितम् - सूर्याश्वैर्यदि मः स जौ स त त गाः शार्दूलविक्रीडितम् ।

उदाहरणानि - १, ७.२५ / १, १७.४१ / ३, १.५६ ।

शिखरिणी - रसैःरुद्रैश्छिन्ना य म न स भ ला गः शिखरिणी ।

उदाहरणानि - १, ७.५४ / १, ७.१०२ ।

## - पादटिप्पणी -

१. प्रणम्य लोकेशमनन्तशक्तिं श्रीशारदाया वचनप्रसादात् ।
श्रीभारमल्लात्मजभोजतुष्ट्यै विरच्यते व्याकरणं सुपद्यैः ॥ १, १.१ ॥

२. अ इ उ ऋ लृ समानाः एषु सन्धिर्न कार्यः, कथमिह यदि पृच्छेन्नास्ति वक्तुर्विवक्षा ।
शठहठकृतसन्धिर्य्र्वादयः स्युः समानाः, अ इ उ णिति विसन्धिः पाणिनीयेऽपि दृष्टः ॥
॥ १, १.३ ॥

३. एषामन्येऽप्युदात्तादि - भेदा भवन्त्यनेकशः ।
तथापि ग्रन्थबाहुल्यान्नोक्तास्तत्रैव भाषया ॥ १, १.१२ ॥

४. आदिवर्णस्तथाऽन्त्येन गृह्यमाणोऽक्षरेण च ।
प्रत्याहारो हि तन्नाम स्यात् सर्वाक्षरसंग्रही ॥ १, १.२१ ॥

५. हकारादिसकारान्ता वर्णा ये परिकीर्तिताः ।
ते हसा व्यञ्जनानि स्युर्वाग्देवीवचनामृतात् ॥ १, १.२८ ॥

६. राद् यपो द्विर्भवेत् प्रायः स्वरपूर्वात् स्वरे परे ।
जलतुम्बिकान्यायेन रेफोर्ध्वगमनं ततः ॥ १, २.८ ॥

७. य्वोर्लोपश् वा पदान्ते ह्य-यवायावां भवेत् कवे !
सम्मताः सर्वशास्त्रेषु प्रयोगाः स्युरिमे यथा ॥ १, २.१७ ॥

८. भवेत्पदान्त एवाऽत्र मोऽनुस्वारो हसे परे।
प्रयोगाः स्युर्यथा सिद्धा-स्त्वं मे पटु वृथादयः ॥ १, ४.१९ ॥

९. क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥ १, ५.१७ ॥

१०. अर्थवद्धातुवर्ज यत् तद्ध्यविभक्ति नाम च ।
शब्दरूपं गिराऽभाणि तस्मात् सिऔजसादयः ॥ १, ६.२ ॥

११. कृत्तद्धितसमासाश्च भवेयुर्नामसंज्ञकाः ।
केचिदत्र वदन्तीति प्रातिपदिकसंज्ञकाः ॥ १, ६.३ ॥

१२. रामो राजमणिः सदा विजयते,
रामं रमेशं भजे,
रामेणाभिहता निशाचरचमू,
रामाय तस्मै नमः।
रामान्नास्ति परायणं परतरम्,
रामस्य दासोऽस्म्यहम्,
रामे चित्तलयः सदा भवतु मे,
भो राम मामुद्धर ॥
(रामरक्षास्तोत्रम् - ३७)

देवो देवगृहे विराजतितराम् -
देवं दया संश्रिता,
देवेन प्रहताः स्वकीयरिपवो-
देवाय शश्वन्नमः ।
देवादेव सुधां समानय सखे,
देवस्य कीर्तिः प्रिया,
देवे रूपमिदं मनोहरमहो,
हे देव सौख्यं कुरु ॥
॥ १, ७.२५ ॥

१३. सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १, १४.२६ ॥

१५. उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि ।
वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः ॥ १, १५.४१ ॥

१५. नत्वाऽचलगणाधीशान् सूरिकल्याणसागरान् ।
कारकाणि सभेदान्या - चष्टे विनयसागरः ॥ १, १६.१ ॥

१६. श्रीश्रीमालकुले श्रीमान् भीमाह्वस्तस्य नन्दनः ।
विनयसागरः ख्याति नाकुसूनुः सुतद्धितम् ॥१, १८.१ ॥

१७. श्री धर्ममूर्तिपदमानसराजहंसः, कल्याणसागरगुरुर्जयताद्धरित्र्याम् ।
शिष्यः समग्रनृपचित्तविनोदकारी, यस्याऽस्ति सन्विनयसागरनामधेयः ॥१, १८.८६ ॥

१८. श्रीभारमल्लतनयो भुवि भोजराजो, राज्यं प्रशास्ति रिपुवर्जितमिन्द्रवद् यः ।
तस्याऽऽज्ञया विनयसागरपाठकेन, सङ्कुम्फिता प्रथमवृत्तिरियं मनोज्ञा ॥ १, १८.८७ ॥

१९. श्रियेऽस्तु वः श्रीधर एकदेवो, नानाभिधानेन समग्रगामी ।
सन्नीलरत्नाधिककान्तिकान्तो, नागाधिराजादिभिरेव सेव्यः ॥२, १.१ ॥

२०. भ्वादिस्ततोऽदादिगणो भवेच्च, ह्वादिर्दिवादिस्तु षुञादिरेव ।
रुधादि - तन्वादि - तुदादयश्च क्र्यादिश्चुरादिर्दशकं गणानाम् ॥ २, १.६ ॥

२१. लट्संज्ञा वर्तमाने हि विधौ लिङ्गाशिषि च लोट् ।
लङ् संज्ञा च दिबादिनां णादौ लिट् लिङ् हि चाशिषि ॥ २,१.११ ॥
तादीनां लुट् तथा ज्ञेया लृट् - संज्ञा च भविष्यतः ।
क्रियातिक्रमणे लृङ् च लुङ् ज्ञेया सिविधौ बुधैः ॥ २, १.१२ ॥

२२. भवताच्चिरमायुष्मान् भवान् भवतु तत्वविद् ।
अध्ययनोद्यतः सौम्य ! भव त्वं बुद्धिवृद्धये ॥ २, १.४३ ॥

२३. महापराक्रमी भीमो न्यायधर्मी युधिष्ठिरः ।
कर्णस्त्यागी, नलो रूपी, बभूव बलवान् बलिः ॥ २, १.५८ ॥

२४. परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन द्वये रूपविधानयत्नः, पत्युः प्रजानां विफलोऽभविष्यत् ॥ २, १.७२ ॥

२५. धातुरज गतौ क्षेप - णेऽस्य स्यादजति क्रिया ।
वी वक्तव्यो ह्यजेरार्ध-धातुके घञपोर्न च ॥ २, १.१४२ ॥

२६. (१) अनिट् स्वरान्तो भवतीति दृश्यताम्, इमांस्तु सेटः प्रवदन्ति तद्विदः ।
अदन्तमृदन्तमृतां च वृङ्वृञौ, श्विडीङिवर्णेष्वथ शीङ्श्रियावपि ॥ २, १.१५१ ॥

(२) गणस्थमूदन्तमुतां च रुस्नुवौ, क्षुव तथोर्णोति मथो युणुक्ष्णुवः ।
इति स्वरान्ता निपुणं समुच्चिताः ततो हलन्तानपि सन्निबोधत ॥ २, १.१५२ ॥

(३) शकिस्तु कान्तेष्वनिडेक इष्यते, घसिश्च सान्तेषु वसिः प्रसारणी ।
रभिश्च भान्तेष्वथ मैथुने यभि - स्ततः तृतीयो लभिरेव नेतरे ॥ २, १.१५३ ॥

(४) यमिर्यमान्तेष्वनिडेक इष्यते, रमिर्दिवादावपि पठ्यते मनिः ।
नमिश्चतुर्थो हनिरेव पञ्चमो, गमिस्तु षष्ठः प्रतिषेधवाचिनाम् ॥ २, १.१५४ ॥

(५) दिहिर्दुहिमेहतिरोहती वहि - र्नहिस्तु षष्ठो दहतिस्तथा लिहिः ।
इमेऽनिटोऽष्टाविह मुक्तसंशया, गणेषु हान्ता : प्रविभज्य कीर्तिताः ॥ २, १.१५५ ॥

(६) दिशिं दृशिं दंशिमथो मृशिं स्पृशिं, रिशिं, रुशिं क्रोशतिमष्टमं विशिम् ।
लिशिं च शान्ताननिटः पुराणगाः पठन्ति पाठेषु दशैव नेतरान् ॥ २, १.१५६ ॥

(७) रुधिः सराधिर्युधिबन्धिसाधयः, क्रुधिः क्षुधिः शुध्यतिबुध्यती व्यधिः ।
इमे तु धान्ता दश चानिटो मताः, ततः परं सिध्यतिरेव नेतरे ॥ २, १.१५७ ॥

(८) शिषिं पिषिं शुष्यतिपुष्यती त्विषिं, श्लिषिं विषिं तुष्यतिदुष्यती द्विषिम् ।
इमान् दशैवोपदिशन्त्यनिट्विधौ, गणेषु षान्तान् कृषिकर्षती तथा ॥ २, १.१५८ ॥

(९) तपिं तिपिं चाऽऽपिमथो वपिं स्वपिं, लुपिं लिपिं तृप्यतिदृप्यती सृपिम् ।
स्वरेण नीचेन शपिं छुपिं क्षिपिं, प्रतीहि पान्तान् पठितांस्त्रयोदश ॥ २, १.१५९ ॥

(१०) अदिं हदिं स्कन्दिभिदिच्छिदिक्षुदीन् शदिं सदिं स्विद्यतिपद्यतिस्विदीन् ।
तुदिं नुदिं विद्यति विन्त इत्यपि, प्रतीहि दान्तान् दशपञ्च चाऽनिटः ॥ २, १.१६१॥

(११)पचिं वचिं विच्-रिचि-रञ्जि-पृच्छतीन्, निजिं सिचिं मुच्-भजि-भञ्जि - भृञ्जतीन् ।
त्यजिं यजिं युज्-रुजि-सञ्जिमज्जतीन्-भुजिं स्वजिं सज्-मृजी विद्ध्यनिट्स्वरान्॥२, १.१६१ ॥

२७. पुण्यैः सम्भाव्यते पुंसामसम्भाव्यमपि क्षितौ ।
तेरुर्मेरुसमाः शैलाः किं न रामस्य वारिधौ ॥ (२, १.२६६)

२८. समानरूपसाधनावतां अन्यगणमध्यपाटीनां धातूनां निर्देशः अत्र न समीचीनः
इति स्पष्टमेव विदूषाम् ।

२९. यमि-रमि-नमि-गमि-हनि-मन्यतयो धातव इहाऽनुदात्ताश्च ।
तनु-तृणु-ऋणु-क्षिणु-वनु-मनु-क्षणु-पृणवस्तनादयः प्रोक्ताः ॥ २,२.२० ॥

३०. मुराङ्गनाकज्जललोपलोलो, लक्ष्मीमुखाम्भोजविलासभृङ्गः ।
जगत्त्रयत्राणतनुत्रभूतो, जघान कंसं किल वासुदेवः ॥२, २.२४ ॥

३१. अथ दम् श्रम् तम्, क्षम्, भ्रम, क्लम्, मद् चैते, शमदमास्तेषाम् ।
रूपाणि पूर्ववत् स्युः ..... ॥ २, ४.२९ अब ॥

३२. मुखकमलं तिलकमलं मञ्जिरौ पादपुण्डरीककमलम् ।
अलकमलं भ्रमरगणास्तव तन्वि ! चकार चक्रतुश्चक्रुः ॥ २, ७.१६ ॥

३३. मुच्-लुप्-विद्-लिप्-सिच्-कृत्-पिश्-खिद् चैते मुचादयः प्रोक्ताः । २, ८.१३

३४. व्यथ दुःखभयचलनयोर्व्यथयति तस्य क्रिया भवेदादौ ।
रूपं लुङि चाऽविव्यथद् एवं रूपाणि सुगमानि ॥ २, ११.३७ ॥

३५. किन्तु शब्दकरणार्थे सङ्क्रीडति - अत एव-

यथाऽनुक्रीडते तद्वत् सङ्क्रीडते पुनः प्रभो ।
स्यात् परिक्रीडते शब्दे चक्रं सङ्क्रीडति च ॥ २, १६.१९ ॥

३६. अत्यागार्थे परस्मैपदं मन्त्रम् उच्चरति इति -

स्यात्तथोदश्चरस्त्यागे मलमुच्चरते यथा ।
त्यागाभावे भवेत् पञ्च-मन्त्रमुच्चरति द्विजः ॥ २, १६.२५.

३७. अनुपूर्वक ज्ञा (जानाति) धातोः सप्रत्ययान्तस्यापि नात्मनेपदं यथा -
दिदृक्षते तिबादौ च दिदृक्षाञ्चक्र एव हि। दिदृक्षिषीष्ट भूते सा-वदिदृक्षिष्ट भूपते॥ २,१६.३०॥

जानातेररनुपूर्वाच्च सान्तादपि तथा न च ।
अनुजिज्ञासति व्याघ्रं कश्चित् पञ्चाननः स्फुरम्॥ २, १६.३१॥

३८. भुज् धातोः उभयपदीत्वे परस्मैपदे नृपो महीं भुनक्ति - यथा-
यद् भुङ्क्त ओदनं विप्रो नृपो नहीं भुनक्ति च। ॥ २,१६.३८ अब॥

३९. ये कर्मनिरपेक्षां ते क्रियामाहुरकर्मकाः।
पुनर्ये कर्मसापेक्षां क्रियामाहुः सकर्मकाः ॥ २, १७.२

४०. लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।
शयनक्रीडारूचि दीत्प्यर्थं धातुगणं तमकर्मकमाहुः ॥ २, १७.३ ॥

४१. उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहार-संहार-विहार-परिहारवत् ॥ २, १७.१३ ॥

४२. (१) पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हराऽमराङ्गनाः ।
विगृह्य चक्रे नमुचिद्विषा वशी य इत्थमस्वास्थमहर्निशं दिवः ॥ (शि. व. १.५१)

(२) शंभुः सशक्तिः सकलः श्रिये स्तात्सुरासुरेन्द्रस्तुतपत्सरोजः ।
सत्सिद्धिसन्दर्भविधौ समर्थः सदोदयः स्राक् सगुणो गणेश ः॥ ३.१॥

४३. श्रीधर्ममूर्तिपदमानसराजहंसः
कल्याणसागरगुरुर्जयताद्धरायाम् ।
शिष्यः समग्रनृपतिविनोदकारी-
यस्याऽस्ति सन् विनयसागरनामधेयः ॥७॥ २, १८.७ ॥

श्री भारमल्लतनयो भुवि भोजराजो,
राज्यं प्रशास्ति रिपुवर्जितमिन्द्रवद् यः ।
तस्याऽऽज्ञया विनयसागरपाठकेन,
त्यादिर्हि वृत्तिरियमत्र कृता मनोज्ञा ॥८॥ २, १८.८ ॥

४४. पचादावप्युहार्याः प्रयोगाः अस्य सदृशः ।
शास्त्रान्तरात् समालोक्य यतोऽयमाकृतिगणः । ३.१६ ।

४५. दृशादेः शो भवेदत्राऽ-कारस्तिष्ठति केयलः ।
कथं तर्हि शंकारस्य गृहीतं ग्रहणं गिरा ॥ ३.२३ ॥

४६. भवेच्छिति चतुर्वद्धि-प्रत्यये कार्यमत्र च ।
इति हेतोर्विधेः पुत्री शकारग्रहणं व्यधात् ॥ ३.२४ ॥

४७. प्रयोगयोर्द्वयोरादिशब्दावदन्तिनाविह ।
निपाताविति विद्वद्भिराख्यातं स्त इमौ यथा ॥ ३.५२ ॥

४८. ग्रहणं त्वन्यधातूनां स्थामित्यत्र बहुत्वतः ।
ई इत्यत्र पुनर्द्वद्वात् ग्रहणं ह्रस्वदीर्घयोः ॥ ३, ८२ ॥

४९. करोति स्म कटं कारुरित्यत्र कृतवान् कटम् ।
कारुकेण कटोऽकारी-त्यर्थे कृतः कटः पुनः ॥ ३.११० ॥

५०. अन्ते प्रान्ते च कीनाशे स्वरूपे च मनोहरे ।
केवलंशुद्धधात्वर्थे भाव इत्यभिधीयते ॥ ३.११२ ॥

५१. एकाचां कृतद्वित्वानाम् आदन्तानां घसेर्वसोः ।
इट् भवेदिह नान्येषाम् आरिवान् ददिवान् यथा । ३.१३२ ॥

५२. शृवन्द्योश्च भवेदारुः शीले स्यातामिमौ यथा ।
शरारुरथ वन्दारु-र्विन्दुरिच्छुर्निपातितौ ॥ ३.१६० ॥

५३. वर्णागमो वर्णविपर्ययश्च-द्वौ चाऽपरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योग-स्तदुच्यते पञ्चविधं निरुक्तम् ॥ १,५.१८ ॥

वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः ।
षोडशादौ विकारः स्यात् वर्णनाशः पृषोदरे ॥ १,५.१९ ॥

वर्णविकारनाशाभ्यां धातोरतिशयेन यः ।
योगः स उच्यते प्राज्ञै-र्मयूरभ्रमरादिषु ॥ (भोजव्याकरणम् १, ५.१८-२० ॥)

५४. नामन्युपपदे क्यप् च भुवो भावे भवेद् यथा ।
ब्रह्मभूयं गतः शत्रु-र्भिद्योध्यौ च निपाततः ॥ ३.२२२ ॥

५५. वर्णात्कारो भवेत् स्वामिन् ! यथाऽकारादयः पुनः ।
रादिफो वाऽत्र रेफश्च रकारोऽपि फलेदथ ॥ ३.२४२ ॥

५६. लोकाच्छेषस्य सिद्धिः स्यामातरादिर्यथा विभो ! ।
इति वचो गिराऽभाणि ग्रन्थभूयस्त्वभीतितः ॥ ३,२४५ ॥

''लोकाच्छेषस्य सिद्धिर्यथा मातरादेः (३, १०.१९) ३.२४५ ।

५७. अनुभूतिस्वरूपाचार्य विरचिते सारस्वते व्याकरणे ,
तथा च चन्द्रकीर्तिमुनेः सुबोधिकाख्यां टीकायां अन्तिममङ्गलरूपेण अयमेव श्लोकः ।